माघ प्रथम सर्ग

॥अथमाघप्रथमसर्गसटीकप्रारंभः॥श्रीनृसिंह॥मारुतीराजप्रसन्न॥

माघ०स०१ १ श्रीगणेशायनमः॥ हरिः ॐ॥ इंदीवरदलश्याममिंदीरानंदकंदलं॥ वंदारुजनमंदारं वंदेहं यदुनंदनं॥१॥ नंताचलेन धरणीतुलमुत्रमन्यपाताल
केलिषु धृतादिवराहलीलं॥ उद्धंधनोल्कणफणाधरगीयमानं क्रीडावतारमिभराजमुखं नमामि॥२॥ शारदाशारदांभोजवदना वदनांबुजे॥ सर्वदा सर्वदा
स्माकं सन्निधिं सन्निधिं क्रियात्॥३॥ वाणीं काणभुजीमजीगणदवाशासीच्च वैयास्यां शार्कीमंत्रस्तंत्रमरंस्त पन्नगगमीगुंफेषु चाजागरीत्॥ वाचामाकलयद्र
हस्यमखिलं यश्चाक्षपादस्फुरां लोके भूद्यदुपज्ञमेव विदुषां सौजन्यजन्यं यशः॥४॥ मल्लिनाथसुधीः सोयं महोपाध्यायशब्दवाक्॥ विधत्ते माघकाव्यस्य व्या
ख्यां सर्वंकषाभिधां॥५॥ ये शब्दार्थपरीक्षणप्रणयिनो ये वा गुणालंक्रिया[illegible]तु किनो विहर्तुमनसो ये च[illegible]ध्वगाः॥ शुभ्यद्द्रावतरंगितेरस
सुधासूरोर्मिमंक्षंति ये ते तेषामेव कृते करोमि विवृतिं माघस्य सर्वंकषां॥६॥ नेतास्मिन्यदुनंदनः सभगवान्वीरः प्रधानो रसः शृंगारादिभिरंगवान्विजयते पू
र्णा पुनर्वर्णना॥ इंद्रप्रस्थगमाद्युपायविषयश्चैद्यावसादः फलं धन्यो माघकविर्वयं तु कृतिनः [illegible]त्सूक्तिसंसेवनात्॥७॥ इहान्वयमुखेनैव सर्वं व्याख्याय
ते मया॥ नामूलं लिख्यते किंचिन्नानपेक्षितमुच्यते॥८॥ अथ तत्र भगवान्माघकविः। काव्यं यशसेर्थकृते व्यवहारविदे शिवेतरक्षतये। सद्यः परनि
र्वृतये कांतासंमिततयोपदेशयुजे॥ इत्याद्यालंकारिकवचनप्रामाण्यात्काव्यस्यानेकश्रेयःसाधनतां॥ काव्यालापांश्च वर्जयेदिति निषेधशास्त्रस्यास
त्काव्यविषयतां च पश्यन् शिशुपालवधाख्यं काव्यं चिकीर्षुश्चिकीर्षितार्थाविघ्नपरिसमाप्तिं संप्रदायाविच्छेदलक्षणफलसाधनत्वात् आशी
र्नमस्क्रियावस्तुनिर्देशो वापि तन्मुखमित्याशीराद्यन्यतमस्य प्रबंधमुखलक्षणत्वाच्च काव्यफलं शिशुपालवधबीजभूतं भगवतः कृष्णस्य ना
रदसंदर्शनरूपं वस्तु आदौ श्रीशब्दपूर्वकं निर्दिशन् कथामुपक्षिपति॥१॥ श्रीसांबायनमोनमः श्रीनृसिंहायनमोनमः॥ श्रीमारुतात्मजायनमः

…ता॥ अत्राद्ये श्रीशब्दप्रयोगाद्वर्णगणादिशुद्धिरप्युच्यते॥ तदुक्तं देवतावाचकाः शब्दा ये च भद्रादिवाचकाः॥ ते सर्वे नैव निंद्याः स्युर्लिपि
णतोपि चेति॥ श्रियः लक्ष्म्याः पतिः अनेन रुक्मिणीरूपया श्रिया समेत इति सूचितं॥ राघवत्वे भवत्सीता रुक्मिणी कृष्णजन्मनीति पु
तु॥ जगन्निवासः जगतामाधारः कुक्षिस्थाखिलभुवन इति भावः॥ तथापि जगल्लोकं शास्तितुं दुष्टनिग्रहशिष्टानुग्रहाभ्यां नियुंक्तु॥ श्रीमति
लक्ष्मीयुक्ते वसुदेवसद्मनि वसुदेवरूपिणः कश्यपस्य वेश्मनि वसन् कृष्णरूपेण तिष्ठन् हरिः विष्णुः अंबरादंतरतं आपतंतं इंद्रसंदेशकथ
नार्थमिति भावः॥ हिरण्यगर्भो हिरण्यगर्भः ब्रह्मा ब्रह्मांडभवत्वात॥ तस्यांगभुवं तनूजं॥ अथवा तस्यांगादुत्संगाद्भवतीति हिरण्यगर्भांगभूः

श्रियः पतिः श्रीमति शासितुं जगज्जगन्निवासो वसुदेवसद्मनि॥ वसन्ददर्शावतरंतमंबराद्धिरण्यगर्भांगभुवं मुनिं हरिः॥ १॥ श्रीसीताराम

तं मुनिं नारदमित्यर्थः॥ उत्संगान्नारदो जज्ञे दक्षोंगुष्ठात्स्वयंभुव इति भागवतात॥ ददर्श कदाचिदिति शेषः॥ अथ वाल्मीयसि वसुदेवसद्मनि सकलजगदाश्र
यतया महीयसो हरेराधेयत्वकथनादधिकप्रभेदोर्थालंकारः॥ तदुक्तं॥ आधाराधेययोरानुरूप्याभावोधिको मतः॥ जगन्निवासस्य जगदेकदेशनिवा
सित्वमिति विरोधश्च तथा नरकस्य सकाशादेः केवलस्यासत्कदाचित्वा जगज्जगदिति सरूपव्यंजनद्वयसंभवाच्चवृत्त्यनुप्रासभेदो शब्दालंकारो
एषां चान्योन्यनिरपेक्षेणैकत्र समावेशात्तिलतंदुलवत्संसृष्टिः॥ सर्गेस्मिन्वंशस्थवृत्तं॥ जतौ तु वंशस्थमुदीरितं जराविति लक्षणात॥ १ ॥ श्री

१ तदानींजनैर्विस्मयादीक्षितुंप्रवृत्तमाह॥गतमिति॥अविद्यमानौऊरूयस्यसअनूरुःअरुणःसारथिर्यस्यतस्यानूरुसारथेःसूर्यस्यग
तंगतिःभावेक्तः॥तिरश्चीनंतिर्यग्भूतं॥विभाषांचेरदिक्स्त्रियामितितिर्यक्शब्दादंचत्यंतात्प्रातिपदिकात्स्वार्थेखप्रत्ययः॥हवि
र्भुजोग्नेरूर्ध्वस्फुरणंप्रसिद्धंरदंतुसर्वतोविसारिधामअधःपततिकिमेतदितिसूर्याग्निविलक्षणमदृष्टपूर्वमिदंधामकिमालकेस्या

॥द्विधाकृतात्माकिमयंदिवाकरोविधूमरोचिःकिमयंहुताशनः॥
॥गतंतिरश्चीनमनूरुसारथेःप्रसिद्धमूर्ध्वज्वलनंहविर्भुजः॥
॥पतत्यधोधामविसारिसर्वतःकिमेतदित्याकुलमीक्षितंजनैः॥ २॥

कुलंविस्मयात्संभ्रांतंयथातथाजनैरीक्षितंईक्षणंकृतंस्वकर्मकादप्यविवक्षितेकर्मणिभावेक्तः॥प्रसिद्धेरथविवक्षातःकर्मणोक
त्क्रियेतिवचनात्॥केचित्कर्मणिक्तांतंकृत्वाईक्षितुंमुनिंददृशुरितिपूर्वेणयोजयंति॥अत्रोपमेयस्यमुनेर्धाम्नःसूर्याग्निभ्यामुपमानाभ्यांतदस्वं
अधःप्रसारणधर्मेणाधिक्यवर्णनाद्व्यतिरेकः॥तदुक्तंकाव्यप्रकाशे॥उपमानाद्यदन्यस्यव्यतिरेकःसएवसः॥२॥श्रीनृसिंहायरे

अथसप्तभिर्मुनिंविशिनष्टि॥नवानित्यादि॥कीदृशमसुंनवान्सद्यःसंभृतसलीलान्॥अतिनीलानितियावत्॥बृहतोविपुलान्पयोधरान्मेघान्अधोधःमेघानांसमीपादधःप्रदेशोस्थितमितिशेषः उपर्यध्यधसःसामीप्येइतिद्विर्भावः तद्योगाद्वितीयाअभिसर्वतसोःकार्याधिगुपर्यादिषुत्रिषुद्वितीयाम्रेडितांतेषुततोन्यत्रापि

माघ०स०१ २

दृश्यतेइतिवचनात्॥समूढःपुंजितेभग्नेइतिविश्वः॥कर्पूरस्यपरागश्चूर्णस्तद्वत्पांडुरंअतएवक्षणंमेघसमीपावस्थानक्षणेअत्यंतसंयोगेद्वितीया॥क्षणेषुकालेषु॥निर्व्यापारस्थितौकालविशेषोत्सवयोःक्षणइत्युभयत्रापिसमरः॥उत्क्षिप्ताउपरिधारितागजेंद्रस्यकृत्तिश्चर्मयेनतेनअजिनंचर्मकृत्तिस्त्यासम

नवानधोधोबृहतःपयोधरान्समूढकर्पूरपरागपांडुरं॥क्षणंक्षणोत्क्षिप्तगजेंद्रकृत्तिनास्फुटोपमंभूतिसितेनशंभुना॥ ४ ॥

दधानमंभोरुहकेसरद्युतीर्जटाःशरच्चंद्रमरीचिरोचिषं॥विपाकपिंगास्तुहिनस्थलीरुहोधराधरेंद्रंव्रततीततीरिव॥ ५ ॥

॥सापेक्षत्वेपिगमकत्वात्समासःसदृशपर्याययोरेवतुल्योपमानाशब्दयोरतुलोपमाभ्यामितिनिषेधत्वात्सादृश्यवाचित्वेतृतीयेत्याहुःकेचिदिमंश्लोकं

त्वेषामित्यर्थः॥भूत्याभस्मनासितेन।भूतिर्भस्मनिसंपदिइतिसमरः॥शंभुनास्फुटाउपमासादृश्यंयस्यतंस्फुटोपमंस्फुटंशंभूपममित्यर्थः॥प्राक्लिखिताया

पांडुत्वावधारणात्स्कंधःपिंडमात्रस्यशंभुयमौचित्यं॥४॥दधानमिति॥अंभोरुहकेसरद्युतीःपद्मकिंजल्कप्रभाःपिशंगीरित्यर्थः॥जटाःदधानंस्वयं

चंद्रमरीचिरिवरोचिर्यस्यतंधवलवर्णमित्यर्थः॥अतएवविपाकेनपरिणामेनपिंगाःपिंगलाःतुहिनस्थल्यांरोहंतीतितुहिनस्थलीरुहःकिंभूतततीत

भगवान्निरनैषीदित्याह॥ चय इति॥ विभुः वस्तुतत्त्वाऽवधारणसमर्थः॥ स हरिः पुरा प्रथमं त्विषां चय इत्यवधारितं तेजःपुंजभावेन निश्चि
तः प्रत्यासन्ने सति विभाविता विस्पष्टा आकृतिः संस्थानं यस्य तं तथोक्तं अत एव शरीरी चेतन इति अवधारितं ततो विभक्ताः विविच्य गृही
ता अवयवा मुखादयो यस्य तं अत एव पुमानित्यवधारितं अमुमागच्छन्तं व्यक्तिविशेषं नारदं वास्तवाभिप्रायेणेति पुल्लिंगनिर्वाहः क्रमात्पूर्वोक्त
सामान्यविशेषज्ञानक्रमेण लोकदृष्ट्यावेदमुक्तं॥ हरिस्तु सर्वं वेदैवेति ततः स नारद इत्यबोधि नारदं बुद्धवानित्यर्थः॥ नारदस्य कर्मत्वेपि

॥ चयस्त्विषामित्यवधारितं पुरा ततः शरीरीति विभाविताकृतिं॥ विभुर्विभक्तावयवं पुमानिति क्रमादमुं नारद इत्यबोधि सः॥ ३ ॥

निपातेन इतिशब्देन अभिहितत्वान्न द्वितीया॥ निपाताद्युपसंख्यानस्योपलक्षणत्वात्॥ यथाह वामनः॥ निपातेनाभिहिते क
र्मणि न कर्मविभक्तिः॥ परिगणनस्य प्रायिकत्वादिति॥ बुध्यतेः कर्मणि लुङ्॥ दीपजनेत्यादिना चिण्॥ चिणो लुगिति लुक्॥
अत्र विभाविताकृतिं विभक्तावयवमित्याद्याकृतिविभावनावयवविभावनयोः पदार्थयोर्विशेषणीत्या शरीरित्वपुंस्त्वावधारण
हेतुत्वेनोपन्यासात्पदार्थहेतुकं काव्यलिंगमलंकारः॥ हेतोर्वाक्यपदार्थत्वे काव्यलिंगमुदाहृतमिति लक्षणात्॥ ३ ॥ श्रीरा

ति॥ पुंनमुजस्तृणविशेषः तन्मयी मेखला मौंजि पिशंगमौंज्या युज्यते ति पिशंगमौंजी युक्तं स त्क्तः द्विषेत्यादिना क्विप्॥ स्त्रियां पुंवदितीत्यादि
गशब्दस्य पुंवद्भावः॥ अर्जुन छवी धवल कांतिं॥ वलक्षो धवलोर्जुन इत्यमरः॥ अंजन द्युति अंजन वर्णं एणाजिनं रुष्णमृगचर्म वसानमाछादयं
त आछादन इतिधातोः शानच् सुवर्णसूत्रेण कनकमेखलया आकलितं बद्धं अधरांबरं अंतरीयमस्यास्तां शिशिवाससो नीलांबरस्य रामस्य तनुं विडंब
अनुकुर्वाणमित्यार्थियमुपमा॥६॥ विहंगेति॥ विहंगराजां गरुडेरिव गरुडस्य लोमतुल्यैः आयतैर्दीर्घैर्हिरण्यस्य विकारा हिरण्मयी दांडिना

॥पिशंगमौंजीयुजमर्जुनछवी वसानमेणाजिनमंजनद्युति॥ सुवर्णसूत्राकलिताधरांबरां विडंबयंतं शितिवाससस्तनुं॥६॥

॥विहंगराजां गरुडैरिवायतैर्हिरण्मयोर्वीरुहवल्लितंतुभिः॥ रुतोपवीतं हिमशुभ्रमुच्चकैर्घनं घनांते तडितां गणैरिव॥७॥

नेत्यादिना मयटि पक्षोपनिपातः तस्यामूर्व्यांरुहाः रूढाः इत्युपलक्षणः कः प्रत्ययः तासां वल्लीनां तंतुभिस्तंतुकल्पैः सूक्ष्मावय
रूपादानगुणाद्धिरण्मयैः रुतोपवीतं शोभार्थकल्पितं यज्ञसूत्रं स्वयं हिमशुभ्रं अत एव घनांते शरदि तडितां गणैरुपश्लि
तं उच्चकैरुन्नते मेघमिव स्थितं॥७॥ श्रीराम राम रघुनंदन राम राम श्रीराम राम भरथाग्रज राम राम॥ श्रीराम राम र
णकर्कश राम राम श्रीराम राम शरणं भव राम राम॥१॥ श्री मातापिता सद्गुरु राज मम मारुति नृसिंह राजा येइंरे॥

निसर्गेति ॥ पुनः निसर्गात्स्वभावादेवचित्राणि कल्मसारणि उज्वलानि भास्वराणि सूक्ष्माणिपक्ष्माणि लोमानियस्ययेन तसनूयोबिसच्छेदोम
णालखंडः तद्वत्सितंअगंतस्यसंगोपस्यतेन चारुचमूरुचर्मणामृगत्वचाकुथेनपृष्टास्तरणेनप्रवेस्यास्तरणंवर्णः परिस्तोमकुथोद्वयोरित्य
ऽइंद्रवाहनंनागेंद्रमैरावतमिवस्थितंइंद्रस्यवाहनमितिस्वभावमात्रस्यविवक्षितत्वात्वाहनमाहितादित्तिणत्वं ॥ यथाहवामनः ॥ नागेंद्रवाह
देन समाहितत्वस्यापिविवक्षितत्वादितिचकासितंदीप्यमानंचकास्तेः शतरिनाभ्यस्ताच्छतुरितिनुमभावः जक्षित्यादयोऽभ्यस्तसंज्ञा ॥ ८ ॥
॥ निसर्गचित्रोज्वलसूक्ष्मपक्ष्मणालसछिद्रस्छेदसितांगसंगिना ॥ चकासतंचारुचमूरुचर्मणाकुथेननागेंद्रमिवेंद्रवाहनं ॥ ८ ॥
॥ अजस्रमास्फालितवल्लकीगुणक्षतोज्वलांगुष्ठनखांशुभिन्नया ॥ पुरः प्रवालैरिवपूरितार्धमाविभांतमच्छःस्फटिकाक्षमालया ॥ ९ ॥
स्रेति ॥ पुनः अजस्रंप्राचुर्येणआस्फालिताः ताडिताः सौष्ठवपरिक्षार्थंन्युज्वाकरांगुष्ठेन तंत्रिताडनंप्रसिद्धंतेषांवल्लकीगुणानांतंत्रीणांक्षतेन
णिनोज्वलैः अंगुष्ठनखांशुभिः भिन्नयाभिश्रयातद्रागरक्तयेत्यर्थः ॥ [illegible] मुक्ताथविद्रुमेः ॥ मुक्ताथविद्रुमः पुंसिप्रवालंपुंनपुं
त्यमरः ॥ पूरितार्धयेवास्थितयाअच्छस्फटिकाक्षमालयाजपमालयेत्यर्थः ॥ तथाप्रसिद्धः स्फटिकग्रहणान्मुनेर्मोक्षार्थत्वंसूचितंस्फटिको
परमितिमोक्षार्थिनांस्फटिकाक्षमालयाभिधानात्आविभांतंविभासमानं ॥ भातेः कर्तरिलट्प्रत्ययः अत्रनखांशुभिन्नयेतिस्वगुणत्यागेनअन्यगुण

स॰१ लघूकरिष्यन्निति। त्वं अतिभारेण दुर्जनस्वरूपेण भंगुरां स्वयं भज्यमानां। भंजभासमिदो घुरच्। भिदुरादयः कर्मकर्तरि इति वामनः। अमुं भुवमि-
त्यर्थः॥ लघूकरिष्यन् किल। अभूततद्भावे च्विः। तृतीया द्यौस्त्रिदिवः स्वर्गः तस्माद्दुनर्थेकविधानं वृत्तिविषये संख्याशब्दस्य पूरणार्थत्वं त्रिभागादिवत्। अ-
वातरः अवतीर्णोसि सांप्रतं संप्रति उदूढलोकत्रितयेन कुक्षाविति शेषः। त्वया धरित्री गुरुः भूयाभारती च क्रियते तरां अतिशयेन क्रियते। तिङश्चेति त-
रप्रकिमेत्तिङेति। आम्प्रत्ययः। लघूकर्तास्थः स गुरुकर्तेति विरोधाभासोलंकारः। अभासत्वे विरोधस्य विरोधाभास उच्यते इति लक्षणात्॥ ३६॥

लघूकरिष्यन्नतिभारभंगुरामसुं किल त्वं त्रिदिवादवातरः॥ उदूढलोकत्रितयेन सांप्रतं गुरुर्धरित्री क्रियतेतरां त्वया॥
३६॥ निजौजसोज्जासयितुं जगद्द्रुहामुपाजिहीथा न भुवस्तलं यदि॥ समाहितैरप्यनिरूपितस्ततः पदं दृशः स्याः कथमीश मादृशां॥ ३७॥

निजौजसेति। निजौजसा स्वतेजसा जगद्भ्यो द्रुह्यंतीति जगद्द्रुहः कंसादयः। सत्सूद्विषेत्यादिना क्विप्। तेषामुज्जासयितुं तान् हंतुमित्यर्थः। जासि-
नि प्रहणेत्यादिना कर्मणि शेषे षष्ठी। असुरहिंसायां सुरादिः। महीतलं नोपाजिहीथाः यदि नावतरश्चेदि। ओं हाङ् गतौ। लिटि थासि रूपं तत-
स्तर्हि समाहितैः समाधिनिष्ठैरपि सकर्मकाद्‌धातोः स्थितादिव दविवक्षिते कर्मणि कर्तरि क्तः अथवा समाहिते चित्तैः चित्तैकाग्र्ये धने षु चिभक्तौ भ्रान्त इति
वदुत्तरपदलोपो द्रष्टव्यः गम्यमानार्थस्याप्रयोग एव लोपोभिमत इति कैयटः। अनिरूपितो अगृहीतस्त्वमीश मादृशां च मे चक्षुषामिति भावः॥ चिन
यामिश्रियं। दृशोः दृष्टेः पदं गोचरः कथं स्याः न कथंचिदित्यर्थः॥ तस्मात्त्वत्साक्षात्कारएव आगमनप्रयोजनमिति भावः॥ ३७॥ श्रीगुरुभ्यो नमः॥

एवं भगवतो निर्गुणस्वरूपमुक्त्वा संप्रति प्रस्तुतोपयोगितया सगुणमाश्लिष्य पद्मिः स्तौति। निवेशयामासिथेति। जगत्त्रयस्य एकः। स्वः पतिः एकोधिपतिः एकश्चिल्पीच। स्वःपतिरपि पतौ न स्त्रि... ...तिस्पे सचिवयोरिति। वैजयंती। त्वं हेलयोध्धृतं वराहावतारे इति भावः। फणभृतामोकसः आश्रयश्च समनश्च। ओकः सद्मनि चाश्रये इति विश्वः। एकं छादनं आवरणं भूतलमुच्चकैरुन्नतेषु अहीश्वरः। शेष एव स्तंभस्य स्तेशिरः सु मूर्धसु अग्रे सहस्रेति भावः। निवेशयामासिथ निहितवानसि। विचालेर्ण्यंतात्लिट्। थलिरूपं रूपं कृञ् चानुप्रयुज्यते लिटीत्यस्तेरनुप्रयोगः। अत्र श्लिष्टाश्लिष्टरूपकयोः हेतुहेतुमद्भावान्श्लिष्टपरंपरितरूपकं ॥ ३४॥

निवेशयामासिथ लीलयेोद्धृतं फणाभृतां छादनमेकमोकसः। जगत्त्रयैकस्वःपतिस्त्वमुच्चकैरहीश्वरस्तंभशिरःसु भूतलं ॥ ३४ ॥

अनन्यगुर्वास्तव केन केवलं पुराणमूर्तेर्महिमावगम्यते ॥ मनुष्यजन्मापि सुरासुरान्गुणैर्भवान्भवोच्छेदकरैः करोत्यधः ॥ ३५ ॥

अनन्येनेति। न विद्यते अन्यो गुरुर्यस्या अनन्या अनन्यगुर्व्याः इति सनीकारांतः पाठः। समासात्प्रागीकारे न घृतश्चेति कप्रसक्तः पश्चात्त्वनुपसर्जनादिति उकारोह्यंतो गुणवचनादिति प्राप्नोति। डि-निद्ध स्वश्चेति वा नदीसंज्ञत्वात्। अप्यथाद्युत्याडागमः। केचित्तु समासांतो विधिरनित्य इति कपं वारयंति। तस्याः सर्वोत्तमायास्तव पुराणमूर्तेः केवलं अमानुषस्यैव केवलः स्यात्केवलश्चावधारइति शाश्वतः। महिमा केवनाग म्यते न केनापीत्यर्थः। कुतः मनुष्यात्जन्म यस्य स मनुष्यजन्मापि भवान् अवतीर्योहि बहुव्रीहौ व्यधिकरणो जन्माद्युत्तरपद इति वामनः। भवच्छेदकरैः संसारनिवर्तकैः गुणैः ज्ञानादिभिः सुरासुरान् सुरासुरविरोधस्य कार्योपाधिकत्वेन शाश्वतिकत्वात्। येषां च विरोधः शाश्वतिक इति न द्वंद्वैकवद्भावइत्याहुः। अधःकरोति। शेषप्रथम इति प्रथमपुरुषः भवच्छब्दस्य युष्मदर्थत्वेन शेषत्वादिति मानुषत्वे

महिमादुरवगाहः अमानुषस्य किमिति तात्पर्यार्थः द्वितीयार्धे अप्रसक्तं जनमनुष्याः ... भवोच्छेदकानुप्रासः ॥ ३५ ॥ १७

प्र

विधायेति ॥ यज्वनो विधिवदिष्टवंतः ॥ यज्वा तु विधिनेष्टवानित्यमरः ॥ सुयजोर्ङ्वनिप् ते षां प्रियो हरिः प्रसेदुषः प्रसन्नस्य सदेः कसुरित्यक्कः तस्य मुनेः अप
चितिं पूजा पूजा नमस्यापचितिरित्यमरः ॥ विधाय प्रकामं अत्यंतं अप्रीयत प्रीतोऽभवत् प्रीञ् दैवादिकात्कर्तरि लङ् मुनिपूजायाः प्रीतिहेतुत्वे अर्थांतरन्यस्य
ति गृहीतुमित्यतु महानुभावाः महात्मनः आर्यान्पूज्यान्परिचर्यया गृहीतुं वशीकर्तुं गृहेर्लिटि ति दीर्घः ॥ मुहुर्नितांतमर्थिनो अभिलाषवंतो हि अर्थिनमर्थ्याभि
लाषः स एषामस्तीति मत्वर्थीयष्ठनिः न तु णिनिः अत्रेकृष्टत्वे तद्धितद्वत्तिर्बलीयसीति भाष्ये ॥१७॥ अशेषेति ॥ अशेषतीर्थेभ्यः उपहृता नाथा कमंडलोः पा

विधाय तस्यापचितिं प्रसेदुषः प्रकाममप्रीयत यज्वनां प्रियः ॥ गृहीतुमार्यान्परिचर्यया मुहुर्महानुभावा हि नितांतमर्थिनः ॥ १७ ॥
अशेषतीर्थोपहृताः कमंडलोर्निधाय पाणावृषिणाभ्युदीरिताः ॥ अघौघविध्वंसविधौ पटीयसीर्नतेन मूर्ध्ना हरिरग्रहीदपः ॥ १८ ॥
स कांचने यत्र मुनेरनुज्ञया नवांबुदश्याम तनुर्न्यवीक्षत ॥ जगाद यज्जंबूजनितः श्रियः श्रियं सुमेरुशृंगस्य तदा तदासनं ॥ १९ ॥

णौ निधाय कमंडलोरुदकपात्रात्कृष्टस्य पाणौ निधायेत्यर्थः ॥ कुस्थलास्त्वचतीत्यादिवत्तत्क्रियांतराक्षिप्तक्रियांतरापेक्षया कमंडलोरनुदकापादानत्वं ॥
अर्थवत्कमंडलुः कुंडीत्यमरः ॥ ऋषिणाभ्युदीरिताः क्षिप्ताः अत एव अघौघानां विध्वंसस्य धौविनाशकरणे पटीयसीः समर्थतराः पट्वीशब्दादीयसुन् कग
न्त्वेति ङीप् अपो जलानि हरिर्नतेन मूर्ध्ना अग्रहीत् स्वीकृतवान् ग्रहेर्लुङ् ॥ १८ ॥ स इति ॥ नवांबुदः श्यामतनुः स हरिः मुनेरनुज्ञया कांचने कनकविकारे
वैकारिकोऽण् प्रत्ययः ॥ यत्र आसने न्यवीक्षत उपविष्टवान् लुङि नेर्विशः इत्यात्मनेपदं ज्ञा लङ् शुषधादनिटः क्स इति क्सः तदासनं तदा हे रहः पवेशनसमये
जंबूः नीलफलो वृक्षविशेषः जंबूः सुरभिपत्रा च राजजंबुर्महाफलेत्यभिधानरत्नमालायां तया जनिता श्रीर्यस्य तथोक्तस्य भाषितस्य पुंवत्कालस्य पुंवद्भा

१०.स.१ सइति॥ तप्तपुटपाकशोधितं कार्तस्वरं रुक्मं कार्तस्वरं जांबूनदमष्टापदोऽस्त्रियामित्यमरः॥ तद्वत्स्वरदीप्यमानमंबरं यस्य सः पीतांबर इत्यर्थः॥ कठोरता

॥सतप्तकार्तस्वरभास्वरांबरः कठोरताराधिपलांछनछविः॥ विदिद्युते वाडवजातवेदसः शिखाभिराश्लिष्ट इवांभसांनिधिः॥२०॥

ताधिपस्य संपूर्णेंदोर्लांछनछविरिव छविर्यस्य इत्युपमानत्वे पदोत्कुत्वा हि उत्तरपदलोपश्च सहरिः वाडवजातवेदसो वडवाग्नेः शिखाभिर्ज्वालाभिराश्लि
ष्ट अंभसांनिधिरिवाब्धिरिव विदिद्युते बभासे॥२०॥ रथांगेति॥ रथांगं चक्रं पाणौ यस्य तस्य हरेः प्रहरणार्थेभ्यः परे निष्ठासप्तम्यौ भवत इति पाणेः परनिपातः

॥रथांगपाणेः पटलेन रोचिषामृषित्विषः संवलिता विरेजिरे॥ चलत्पलाशांतरगोचरास्तरोस्तुषारमूर्तेरिव नक्तमंशवः॥२१॥

रोचिषां पटलेन संवलिताः संमिलिताः ऋषित्विषः नक्तं रात्रौ सप्तम्यर्थेऽव्ययं तरोश्चलतां पलाशानां पत्राणां अंतराणि विवराणि गोचराः आश्रयाः
येषां ते तुषारमूर्तेर्यस्येंदोरंशव इव विरेजिरे चकाशिरे॥२१॥ प्रफुल्लेति॥ प्रफुल्लस्य फुल्ल विकासने इति विधातोः पचाद्यच् तं फले स्तु निष्ठायाम

॥प्रफुल्लतापिच्छनिभैरभीषुभिः शुभैश्च सप्तच्छदपांसुपांडुभिः॥ परस्परेण च्छुरितामलच्छवी तदेकवर्णाविव तौ बभूवतुः॥२२॥

नुपसर्गात्फुल्लक्षीबकृशोल्लाघा इति नियमात् प्रफुल्लमित्येवेति क्षीरस्वामी तापिच्छस्य॥ तमालस्य पुष्पं तापिच्छं॥ फले लुगिति लुक्॥ इहीनं
प्रसवे सर्वमिति नपुंसकत्वं॥ कालस्कंधस्तु तमालः स्यात्तापिच्छोऽप्यथ सिंधुके इत्यमरः॥ तेन सादृश्ये प्रफुल्लतापिच्छनिभैः सनिसससमासत्वादस्य
पदविग्रहः॥ अत एवस्फुरुत्तरपदेत्वमी निभसंकाशनीकाशप्रतीकाशोपमादय इत्यमरः॥ सप्तच्छदः पर्णानि पर्वसु यस्येति सप्तच्छदो वृक्षभेदः॥ सप्त
पर्णो विशालत्वक् शारदो विषमच्छद इत्यमरः॥ संज्ञायां ह्रस्ववृत्तिविषये वीप्सार्थत्वं सप्तपर्णादिवत् भाष्ये शेषं तापिच्छवत्तस्य पुष्पाणि सप्तच्छदानि तेषां पां

नं ४

युगांतकालेति॥युगांतकालप्रतिसंहृता:आत्मान्युपसंहृताआत्मानोजीवा:येनतस्यकैटभद्विषोहरेर्यस्यांतनौजगंतिसविकारंसविभ्रमंआसनअतिष्ठ
तआसनउपवेशनेलुङ्तत्रतनौदेहेतपोधनस्याभ्यागमेनसंभवंतीतिसंभवा:संभूता:पचाद्यच्मुद:संतोषा:नममु:अतिरिच्यंतेस्यर्थ:॥चतुर्दशभुव
नपर्यासेरतनयांतीतिकविप्रौढोतिसिद्धातिशयेनस्वत:सिद्धस्याभेदेबाध्यवसितत्वादतिशयोक्ति:॥साचमुदामंत:संबंधे[illegible]
पा॥२३॥निदाघेति॥निदाघउष्मंधामयस्यैंतथोक्तं॥निदाघोघर्मकालेस्यादुष्मस्वेदांबुनोरपीतिविश्व:॥अर्कमिवअधिदीधितिमधिकतेजसंमुनि

॥युगांतकालप्रतिसंहृतात्मनोजगंतियस्यांसविकारमासत॥तनौममुस्तत्रनकैटभद्विषस्तपोधनाभ्यागमसंभवामुद:॥२३॥
॥निदाघमानामिवाधिदीधितिंमुदाविकाशंमुनिमभ्युपेयुषी॥विलोचनेबिभ्रदधिश्रित:श्रिणीसपुंडरीकाक्षइतिस्फुटोभवत॥२४

मभिलक्ष्यअभिरभागइतिलक्षणेकर्मप्रवचनीयसंज्ञाकर्मप्रवचनीययुक्तेद्वितीयामुदाविकाशंमुपेयुषीउपगतेक्वसुप्रत्ययांतोनिपात:॥अतएवा
धिश्रिताश्रीर्याभ्यांतेतथोक्तेइकोचिविभक्तावितिनुमागम:॥विलोचनेबिभ्रतानाभ्यस्तात्शतुरितिनुमभाव:॥सहरि:पुंडरीकाक्षइत्येवंस्फु
टोभवतसूर्यसन्निधानेश्रीनिवासत्वेनपुंडरीकसाधर्म्यात्पुंडरीकेइवअक्षिणीयस्येत्येवयथार्थलाभेपुंडरीकाक्षइतिवक्तव्य॥अन्वर्थसंज्ञो
भूदित्यर्थ:॥अत्रबिभ्रतस्फुटोभयादितिपदार्थहेतुकवाचकयलिंगस्यनिदाघधामाभित्युपमापेक्षत्वादनयोरंगांगीभावेनसंकर:॥ २४॥श्रीरां

सितमिति॥अथोभयरूपयेत्रानानंतरं अच्युतो हेतुकर्ता॥विसारिभिरभीक्ष्णं प्रसरद्भिः वुञ्‌ लमाभीक्ष्ण इति णिनिः॥द्विजावलिर्दंतपंक्तिः दंतविप्राण्ड
जाद्विजा इत्यमरः॥सेवव्याजः कपटं यस्य सः न द्रूप इत्यर्थः॥स चासौ निशाकरश्च तस्यांशुभिः किरणैः सितं स्वभावशुभ्रं मुनेर्वपुः सौधं प्रासादमि
वसुतरामत्यंतं॥अव्ययादाम्प्रत्ययः॥सितिम्नाधावल्येन प्रयोज्यकर्ता लंभयन् अपारयन् अतिधवलयन्नित्यर्थः॥लभेरत्र गत्युपसर्जनप्राप्त्य
र्थत्वेन आगत्यर्थत्वात्॥गतिबुद्धीत्यादिना णिकर्तुः कर्मत्वं।तथा ह वामनः॥लभेर्गत्यर्थत्वात् णिचि अणौ कर्तुः कर्मत्वाकर्मत्वेति प्राप्त्युपसर्जने गत्यर्थत्वे तु
कर्मत्वमेवेति रहस्यं लभेश्चेति नुमागमः॥शुचिस्मितां वाचमवोचत उक्तवान् स्मितपूर्वाभिभाषी च राघव इति न्यायादिति भावः॥शुचेत्यवि लङ्‌च

॥हरिस्यघं संप्रति हेतुरेष्यतः शुभस्य पूर्वाचरितैः कृतं शुभैः॥शरीरभाजां भवदीयदर्शनं व्यनक्ति कालत्रितयेपि योग्यतां॥२६॥
॥सितं सितिम्ना सुतरां मुनेर्वपुर्विसारिभिः सौधमिवाथ लंभयन्॥द्विजावलिव्याजनिशाकरांशुभिः शुचिस्मितां वाचमवोचदच्युतः॥२५॥

चउम् इत्युपमागमे गुणः॥अत्र सौधमिवेत्युपमायाः सितिम्ना लंभयन्न इत्यसंबंधरूपातिशयोक्तिः॥द्विजावलिव्याजनिशाकरेल छली दिश
ब्देः असत्यत्वप्रतिपादनरूपायकृतस्य चमिथोनेरपेक्षात्संसृष्टिः॥२५॥हरतीति॥किमवोचत् तदेवाह॥हे मुने भवदीयदर्शनं शरीरभाजां प्राणिना
मित्यर्थः॥भजोण्विः कालत्रितये भूतादिकालत्रितयेपि योग्यतां पवित्रतां व्यनक्ति गमयति कुतः संप्रति दर्शनकाले अघं पापं हरति एष्यतो
भाविनः शुभस्य श्रेयसो हेतुः तथा पूर्वाचरितैः प्रागनुष्ठितैः शुभैः सकृतैः कृतं॥एवं त्रैकाल्येपि स्वकार्येषु नकर्तृत्वेन च पुंसि सुकृतसमवा
मवगमयतः दर्शनं कस्य न भाग्यमिति भावः॥अत्र हरतीति आदिवाक्यत्रयार्थस्य शरीरस्याद्विवाक्यहेतुत्वोक्त्या वाक्यार्थहेतुकं काव्यलिंगमलंकारः॥२६॥

त्यदुक्तं योगिनामपित्वमेव साक्षात्करणीय इति तदेव द्रढयति ॥ उदीर्णरागेति ॥ उदीर्णः उद्रिक्तः रागो विषयाभिलाषः स एव प्रतिरोधः प्रतिबंधकः पाठचर
श्च यस्मिं तं ॥ प्रतिरोधिपरास्कंदी पाठच्चरमलिम्लुच इत्यमरः ॥ अभीक्ष्णं अक्षुण्णतया अनभ्यस्तत्वेनाप्रतिहतत्वेन च जनैरतिदुर्गमं ॥ मोक्षपथं अपवर्गमा
र्गकांतारं त्वं उपेयुषः प्राप्तवतः ॥ उपेयिवाननाश्वाननूचानश्चेति कसंतो निपातः ॥ मनस्विनः सुमनसो धीरस्य च अग्रं सायोविनिः ॥ त्वमेव निरपायः पुनरा
वृत्तिरहितः संश्रयाः प्राप्तिर्यस्याः सा तथोक्ता ॥ न स पुनरावर्तने इति श्रुतेः ॥ अग्रभूमिः प्राप्यस्थानं ॥ अग्रमालंबने प्राप्यमिति विश्वः ॥ सोहमित्यादिश्रुतेस्त्व

॥ उदीर्णरागप्रतिरोधकं जनैरभीक्ष्णमक्षुण्णतयातिदुर्गमं ॥
॥ उपेयुषो मोक्षपथं मनस्विनः त्वमग्रभूमिर्निरपायसंश्रया ॥ ३२ ॥

वृत्तिरहितः संश्रयाः प्राप्तिर्यस्याः सा तथोक्ता ॥ न स पुनरावर्तने इति श्रुतेः ॥ अग्रभूमिः प्राप्यस्थानं ॥ अग्रमालंबने प्राप्यमिति विश्वः ॥ सो
हमित्यादिश्रुतेस्त्वत्प्राप्तेरेव मोक्षत्वादिति भावः ॥ तस्मान्मुमुक्षूणामपित्वमेव साक्षात्करणीय इति श्रुतेः यथा कस्यचित्कुत
श्चित्संकटं निर्गमस्थानं विलक्षणेन गस्य किंचिन्निर्बाधस्थानप्राप्तिरभयाय कल्पते तथा त्वमपि मुमुक्षोरिति ध्वनिः ॥ ३२ ॥
श्रीरामे

१॥ सोपित्वमेवेत्याह ॥ उदासितारमिति ॥ पुराविदः पूर्वज्ञाः कपिलादयः त्वां निगृहीतमानसैः अंतर्निर्बद्धचित्तैर्योगिभिः आत्मनि अधि १

घ० म० १ ननु प्रकृतिविविक्तपुरुषसाक्षात्कारात् मोक्षो नान्यत्साक्षात्कारादित्याशंक्य इति अध्यात्मदृक् ज्ञानं तया अध्यात्मदृशा प्रत्यक्दृष्ट्या कथं

१० चन गृहीतं साक्षात्कृतं ॥ केन रूपेण गृहीतमित्यत आह ॥ उदासितारं उदासीनं प्रकृतौ स्वार्थप्रवृत्त्या मपि स्वयममारूढत्वाद्द्रष्टारमि

त्यर्थः ॥ आसेतृच् ॥ विकारेभ्यो बहिर्बहिर्विकारं महदादिभ्यः पृथग्भूतमित्यर्थः ॥ अपपरिबहिरंचवः पंचम्या इत्यव्ययीभावः ॥ किंच

॥ उदासितारं निगृहीतमानसैर्गृहीतमध्यात्मदृशा कथंचन ॥

॥ बहिर्विकारं प्रकृतेः पृथग्विदुः पुरातनं त्वां पुरुषं पुराविदः ॥ ३३ ॥

प्रकृतेस्त्रैगुण्यात्मनो मूलकारणात् पृथग्भिन्नः ॥ प्रकृतिः पंचभूतेषु प्रधाने मूलकारणे इति यादवः ॥ पुराभवं पुरातनमनादि ॥ सायंचि

रमित्यादिना ट्युप्रत्ययः ॥ पुरुषं पुरुषपदवाच्यं विज्ञानघनं विदुर्वदंति ॥ विशेषकटोचो तिसर्जुसादेशः ॥ यथाहुः ॥ मूलप्रकृतिरविकृति

८ महदाद्याः प्रकृतिविकृतयः सप्त ॥ षोडशकश्च विकारो न प्रकृतिर्न विकृतिः पुरुष इति ॥ अजामेकां लोहितशुक्लकृष्णामित्यादिश्रुतेश्च ॥ सो पित्वमेव

नन्वकोऽयं निर्बन्धो यस्मिन् मम वाऽयं दुष्टनिग्रहाधिकार इत्याशंक्य अनन्यसाधारणत्वादित्याह ॥ उपप्लुतमिति । विश्वं बिभर्तीति विश्वंभरः तत्संबुद्धौ हे विश्वंभर विश्वत्रातः । संत्राणार्थं भवद्व्रजीत्यादिना स्वशरणप्रत्ययेनु मागमः । मदोषैस्तैः कैः सद्भिरुपप्लुतं पीडितं मदो विश्वं पातुं त्वमेव ईशीषे शक्नोषि विश्वंभरत्वादिति भावः । ईश ऐश्वर्ये लिटि थासि रूपं । अत्र वैधर्म्येण दृष्टान्तमाह । क्षपायास्तमस्कांडैः तमोवर्गैः कौ

उपप्लुतं पातुमदो मदोऽस्ने त्वमेव विश्वंभर विश्वमीशिषे ॥ ऋतेरवेः क्षालयितुं क्षमेत कः क्षपातमस्का-
ण्डमलीमसं नभः ॥ ३९ ॥

ओस्त्री दंडवाणार्णवे वर्गौ वसरत्वाशिविश्विस्यमरः । कस्कादिषु चेति विसर्जनीयस्य सत्वं । मलीमसं मलिनं । मलीमसं तु मलिनं कच्चरं मलदूषितमित्यमरः । ज्योत्स्नातमिस्रेत्यादिना मत्वर्थीयो निपातः । नभः क्षालयितुरवेः ऋते रविं विना । अन्यारादितरर्ते इति पंचमी । कः क्षमेत कः शक्नुयान्न कोऽपीत्यर्थः । अत्र वाक्यद्वये समानधर्मस्यैकस्यैवेशिषे क्षमेतेति शब्दद्वयेन वस्तुप्रतिवस्तुभावेन निर्देशात् अपि व्यतिरेकमुखत्वात् वैधर्म्येण प्रतिवस्तूप-

मालंकारः । मदुक्तं सर्वस्य वाक्यार्थगतत्वेन साम्य
स्यास्य वाक्यद्वये पृथक् निर्देशे प्रतिवस्तूपमा ॥ ३९

माघ-स१ करोतीति। किंच जनो मृगाणामिव कंसादिमहीभृतां वधात्तेनो स्तवं स्तोत्रं। स्तवस्तोत्रं स्तुतिर्नुतिरित्यमरः। करोतीति यत्। हे हरे कृष्ण असि हेति चगम्य
ते। सा स्तुतिस्त्रिया। हिरण्याक्षपुरःसराः तत्प्रवद्द्विपास्तेषां द्विषो हंतुरित्यर्थः। तस्य तव प्रत्युत वैपरीत्येन। प्रत्युते त्युक्ते। वैपरीत्य इति। गणव्याख्याने
तिरस्क्रिया। अवमानः यदिति सामान्येन पुंसकं सेति विधेयलिंगं। गजघातिनः सिंहस्य मृगवधवर्णनमिव महदसुरहंतुस्तव कंसादिक्षुद्रनृप
वधोद्घाटनं तिरस्कार एवेत्यर्थः। अत्रासुरद्विपानां हरिवधरितिश्लिष्टपरंपरितरूपकत्वे मृगाणामिवेत्युपमयाअंगांगीभावेन संकीर्यते॥३९॥

करोति कंसादिमहीभृतां वधाज्जनो मृगाणामिव यत्तव स्तवं॥ हरे हिरण्याक्षपुरःसरासुरद्विपद्विषः प्रसुत सा तिरस्क्रिया॥
३९॥ प्रवृत्त एव स्वयमुज्झितः श्रमः क्रमेण पेष्टुं भुवनद्विषामसि॥ तथापि वाचालतया युनक्ति मां मिथस्त्वदाभाषणलोलुपं मनः॥४०॥

एवं स्तुत्यादेनमभिमुखीकृत्य आगमनप्रयोजनं वक्तुमुपोद्घाटयति। प्रवृत्त इति॥ त्वं उज्झितश्रमः त्यक्तश्रमः सन् क्रमेण भुवनद्विषां भुवनानि
द्विषंतमुद्धाः तेषां पेष्टुं तान् हंतुमित्यर्थः। नासि निप्रेतिन्नी कर्मणि षष्ठी। स्वयमपरप्रेरित एव प्रवृत्तोसि। एवं तर्हि पिष्टपेषणतामाकारोनिवेत्
तत्राह। तथापि स्वतः प्रवृत्तेपि मिथो रहसि त्वदाभाषणे त्वया सह संलापे लोलुपं लुब्धं। लुब्धो भिलाषुकस्तृष्णुक समौ लोलुपलोलुभावित्यमरः॥
मनो मां वाचालतया सह युनक्ति। वाचालं करोतीत्यर्थः। वाचो वह्व्यो स्य संतीति वाचालः॥ आलजाटचौ बहुभाषिणीत्यालच् प्रत्ययः। जल्पाकस्तु वाचालो-

अथ स्ववाक्यश्रवणं सहेतुकं प्रार्थयते। तदिति। तत्तस्मादिंद्रमुपगतः। उपेंद्रः इंद्रावरजः अत एव इंद्रसंदिष्टं श्रोतव्यमिति भावः। किंच विश्वस्मै
जनाय हितं विश्वजनीनं आत्मन्विश्वजनेत्यादिना खः। यद्वचः क्षणं न तु चिरं मया अतेन द्वचो अहिद्विषो वृत्रारेः सर्पे वृत्रासुरे स्यहिरिति वैजयंती।
समस्तकार्येषु धुर्यतां धुरंधरत्वं गतेनातोपि भवता तन्निशाम्यतां श्रूयतां प्रार्थनायां लोट्। धुरं वहतीति धुर्यः। धुरो यड्ढकौ इति यत्प्रत्ययः। स्फुटमत्र पदा
र्थहेतुकं काव्यलिंगमलंकारः॥४१॥ अथ शिशुपालो हंतव्य इति वक्तुं तस्यावश्यवधत्वे नन्यवधत्वज्ञापनौपयिकतयास्यैवस्य प्रकटनार्थं जन्मांतरे
निवृत्तांतं तावदुदाहरति॥ अभूदिति॥ प्रतिपक्षात् शत्रोर्जन्म यासां तासां भियामभूमिः अविषयो निर्भीक इत्यर्थः तपनद्युतिः सूर्यप्रतापो दितेस्त

तदिंद्रसंदिष्टमुपेंद्र यद्वचः क्षणं मया विश्वजनीयमुच्यते। समस्तकार्येषु गतेन धूर्यतामहिद्विषस्तद्भवता निशाम्यतां॥४१॥
अभूदभूमिः प्रतिपक्षजन्मनां भियां तनूजस्तपनद्युतिर्दितेः॥ यमिंद्रशब्दार्थनिषूदनं हरेर्हिरण्यपूर्वं कशिपुं प्रचक्षते॥४२॥

नूजो दैत्योऽभूत्। कोसावत आह। हरेः इंद्रस्य इंद्रशब्दार्थनिषूदनं। इंदतीति इंद्रः इदि परमैश्वर्ये॥ ऋज्रेंद्रेत्यादिना रप्रत्ययांतो औणादिको निपातः।
तस्य इंद्रशब्दस्य इंद्र इति संज्ञापदस्यार्थः अर्थः परमैश्वर्यलक्षणः तस्य निषूदनं निवर्तनं। कर्तरि ल्युट्। हे हरेरैश्वर्यहर्तारमित्यर्थः। यदेवं हिर
ण्यपूर्वं कशिपुं प्रचक्षते। हिरण्यकशिपुमाहुरित्यर्थः। अत्र हिरण्यपूर्वकत्वं कशिपुशब्दस्यैव न तु संज्ञिनस्तदर्थस्येति शब्दपरस्य कशिपुशब्दा
र्थगतत्वेनाप्रयोगस्य प्रयोगाद्वाच्यवचनार्थाख्यं दोषमाहुः॥ यद्वाच्यवचनं हि तदिति समाधानमेवं विधविषये शब्दपरेणार्थलक्षणेति कथं
चित्संपाद्यमित्युक्तमस्माभिः। देवपूर्वं गिरिं तदिति धनुरुपपदमस्मै वेरभ्यादिदेशास्येतद्वाक्यानावसरे संजिविन्यां घंटापथे च विरोधश्चात्रा

समत्सरेति। समत्सरेण सवैरेण असूयतीत्यसुरः। असेरुरन् असुर इति नाम्न श्चिराय चिरकालेन। चिराय चिररात्राय चिरस्याद्याश्चिरा र्थका इत्यमरः॥ प्रथमाभिधेयताउपेयुषा अन्वर्थे यान्मुख्यार्थतां गतेन तरस्विना बलवता। तरसो बलं रंहसीति विश्वः। येन हिरण्यकशि पुनादिविसदं तीति द्युसदां देवानां मनःसु भयस्य पूर्वावतारः प्रथमप्रवेशः कृदोरप् न्यधीयत निहितः। धियः कर्मणि लुङ्। तस्माद्देव देवा नां भयोत्पत्तिरभूदित्यर्थः॥४३॥ दिशामिति॥ श्रियः संपदः यतो यदेत्यर्थः दिशामधीशान् दिक्पतीन् अपि चतुरः सुरान् इंद्रवरुणयमकुबेरान् अपास्य विहाय तं हिरण्यकशिपुं रागहृताः रागाकृष्टाः सत्यः नतु बलादिति भावः। सिषेविरे यतो चोरप्रियाः श्रिय इति भावः। ततः आरभ्य नेदाप्र

समत्सरेणासुर इत्युपेयुषा चिराय नाम्नः प्रथमाभिधेयतां॥ भयस्य पूर्वावतरस्तरस्विना मनःसु येन द्युसदां न्यधीयत॥४३॥ दिशामधीशांश्च तुरो यतः सुरानपास्य तं रागहृताः सिषेविरे॥ अवापुरारभ्य ततश्चला इति प्रवादमुच्चैरयशस्करं श्रियः॥४४॥ पुराणि दुर्गाणि निशातमायु धं बलानि शूराणि घनाश्च कंचुकाः॥ स्वरूपशोभैकफलानि नाकिनां गणैर्यमाशंक्य तदादि चक्रिरे॥४५॥ श्रीं नमः श्रीवायवे नमः॥ ७॥ १॥

भृ इति अत्रायः करोतीत्ययशस्करं दुःकीर्तिहेतुकमित्यर्थः। कृञो हेतुताछील्यानुलोम्येष्विति टप्रत्ययः। अतः कृकमीत्यादिना विसर्जनीयस्य सत्वं उच्चैः प्रभूतं चला इति अस्थिरा इति प्रवादं जनवादमवापुः दिगीशानामपि सर्वस्वहरणमिति न दोषस्तस्य परा काष्ठेति भावः॥४४॥ पुराणीति॥ कि च नाकिनां सुराणां गणैः यं हिरण्यकशिपुमाशंक्य बाधकत्वेनोत्प्रेक्ष्य स कालः आदिर्यस्मिन् तत्तदा प्रभृति। स्वरूपशोभैव एकं फलं मुख्यं प्रयोजनं ए षां पुरादीनां तानि तथोक्तानि शाकृतादग साध्यशास्त्रवाभावादिति भावः। नपुंसकमनपुंसकेनेति नेनपुंसकैकशेषः॥ पुराणि दुर्गाणि प्राकारपरि खादिभिरगम्यानि चक्रिरे सदु रूपसरव्यानमिति गमेर्डः। आयुधं निशातं च निशितं चक्रे। शो तनूकरणे इति धातोः क्तः। शाछोरन्यतरस्यामिति इत्व

स इति। अन्येषु भुवनेषु भुवनांतरेषु। सुप् सुपेति समासः। संचरिष्णुः संचरणशीलः। अलंकृञित्यादिना चेरिष्णुच्। श्रियां आश्रयः सहिर
ण्यकशिपुः पदच्छायास्वैरकृत्या। पदच्छायैवेति तस्य मरः। यं दिनाम श्रियां श्रियते। श्रयतेर्लुङ्। णिश्रीत्यादिना चङ्। द्विर्भावः। इयङादेशः। मुकुटोत्सु
लेषु मौलिहारकेषु स्खलनैः करायेषां तैः शिरसि बद्धाञ्जलिभिरित्यर्थः। उपलः प्रस्तरे रत्ने इति विश्वः। तिस्रो दशा अवस्था बाल्यकौमारयौवना
नि अन्यसत्ता च्युतयो यायेषां तैः त्रिदशैर्देवैः यद्वा त्रिंशत्परिमाणमेषामिति। बहुव्रीहौ संख्येये डजेति डच्। बहुलग्रहणात् त्रिंश्च संध्याः समाहृताः त्रि
संध्यं तत्र स्थितार्थे स्यादिना समाहारो द्विगुः द्विगुरेकवचनं वाटाबन्तः इति पक्षे नपुंसकत्वं अस्तं संयोगे द्वितीयात्तस्येदिशो नमः स्वस्त्यादिना चतुर्थी न

स संचरिष्णुर्भुवनांतरेषु यां पदच्छायाश्रियदाश्रयः श्रिया। अकारि तस्मै मुकुटोपलस्खलत्करैस्त्रिसंध्यं त्रिदशैर्दिशे नमः॥ ५६॥
सटाच्छटाभिन्नघनेन बिभ्रता नृसिंह सैंहीमतनुं तनुं त्वया। स मुग्धकान्तास्तनसंगभंगुरैरुरोविदारं प्रतिचस्करे नखैः॥ ५७॥ श्रीः॥

नो नमस्कारः अकारि कृतः कृञः कर्मणि लुङ्। चिण् भावकर्मणोरिति चिण्॥ ५६॥ अथ सोऽपि त्वयैव संहृत इत्याह। सटेति। हे नृसिंह नरसिंह इवे
स्फलमिति समासः। नावासौ सिंहश्चेति प्रस्तावात्। सिंहस्येदं सैंही तां मतनुं कायं बिभ्रता नृसिंहावतारभाजा इत्यर्थः। अत एव सटाच्छटाभिः केसर
समूहैर्भिन्ना घनाः मेघाः येन आश्लेषविग्रहत्वादिति भावः। सटाच्छटा केसरयोस्तनुः काये कृशे त्वचे चेति विश्वः। त्वया स दैत्यः मुग्धो। नवो। मुग्धः सौ
म्ये नवे मूढः इति वैजयंती। यो कान्तास्तनयोः संगेनापि भंगुरैर्नखैः उरो वक्षो विदार्यते इति उरोविदारं परिविश्यमाने चेति णमुल्प्रत्ययः। प्रतिचस्करे हतः
किरतेः कर्मणि लिट्। उच्छ्रितानामितिगुणः हिंसायां प्रतेश्चेति सुट् आगमः वेजकष्टं नोपि मनखैर्विदारित इत्यवाङ्मनसगोचरं महिमानं लेकिमसाध्य

माघ-स॰ २ अथानंतरभस्य जन्मचेष्टितान्याचष्टे। विनोदमिति। अथ स हिरण्यकशिपुः पुनः भूयोपि त्रिदशैः समं सह। हास्ताकेसहे स्मभरः। रणेन दर्पादंतः
तो जन्म यस्याः तस्याः कंड्वाः भुजकंडूतेर्विनोदमिच्छन् प्राग्भवनस्वक्षतैः॥ तदपनोदाभावादित्यर्थः। दिवः स्वर्गस्य क्षतं नरक्षणं रक्षणं येन तत्
क्षतरक्षणमिति भावः। सापेक्षत्वेपि गमकत्वात्समासः। अनेन देवसर्वस्वापहारित्वमुक्तं। भीषयते इति भीषणं नंद्यादित्वाल्ल्युप्रत्ययः। निका
मं भीषणं सुप्सुपेति समासः। रावणो नाम रावण इति प्रसिद्धं। राक्षो बभूव राक्षसयोनौ जात इत्यर्थः। विश्रवसोपत्यं पुमान् रावण इति विग्रहः॥

विनोदमिच्छन्नथ दर्पजन्मनो रणेन कंड्वास्त्रिदशैः समं पुनः॥ स रावणो नाम निकामभीषणं बभूव र
क्षः क्षतरक्षणं दिवः॥ ४८॥ प्रभुर्बुभूषुर्भुवनत्रयस्य यः शिरोतिरागाद्दशमं चिकर्तिषुः॥ ७॥

तस्यापत्यमित्यणि ऋ। विश्रवसो विश्रवस रावणाविति प्रकृते रावणादेशः। पौराणिकास्तु रावयतीति रावण इति व्युत्पादयंति। तदुक्तं उत्तरकांडे।
यस्माल्लोकत्रयं चैतद्रावितं भयमागतं तस्मात्त्वं रावणो नाम नाम्ना वीर भविष्यसि इति। शिरोतेर्णृतोकर्तेरिष्णुच्। रावणोऽरक्षस्तो भिन्नपदलिंगत्वाद्विशेष
णविशेष्यत्वेपि स्वलिंगता॥ ४८॥ अस्यैव दशमाद्यश्लोक्याख्याचष्टे। प्रभुरिति। यो रावणः भुवनत्रयस्य प्रभुः बुभूषुः भवितुमिच्छुः कृतीच्छेदनार
निधातोः सन्नंतादुप्रत्ययः। इष्टसाहसः प्रियसाहसः। अत एवेच्छासदृशं स्वेच्छानुरूपं पिनाकिनः प्रसादं वरं विघ्नमिवातर्कयत्। उत्प्रेक्षितवा
निति परमसाहसिकोक्तिः। इति आरभ्य श्लोकषट्केपि यच्छब्दस्य स रावणो नाम रक्षो बभूवेति पूर्वेणान्वयः॥

रंगराजस्तु नवेऽक्रमसाक्रमताधिकं परमिति उपरिष्टादन्वयदूत्याह। नरसन्नु। गुणानां च परार्थत्वादिति न्यायादारुण्यादिवत्तस्यैकं प्रधा
नान्वयिनां मिथः संबंधायोगादित्यलं शाखाचंक्रमणेन। पुरा किल रावणः काम्ये कर्मणि प्रजापतिप्रीणनाय नवशिरांस्यग्नौ हुत्वा दशमारंभे
संतुष्टात्तस्मात्त्रैलोक्याधिपत्यं वव्रे। इत्युत्तरकांडोक्ता कथात्रानुसंधेया॥ ४९॥ अथ कैलासोत्क्षेपदृष्टांतमाह॥ समुत्क्षिपन्निति॥ यो रावणः
पृथिवीभर्तां वरं कैलासं समुत्क्षिपन्नुद्धृतवानिति शेषः। शूलिनो वरप्रदानस्य पूर्वोक्तस्य त्रसंत्याः शैलचलनेन बिभ्यत्याः तुषाराद्रिसुतायाः पा

अतर्कयद्विघ्नमिवेशसाहसः प्रसादमिच्छासदृशं पिनाकिनः॥ ४९॥ समुत्क्षिपन्यः पृथिवीभृ
तां वरं वरप्रदानस्य चकार शूलिनः॥ त्रसत्तुषाराद्रिसुताससंभ्रमस्वयंग्रहाश्लेषसुखेन निष्क्रयं॥ ५०॥

र्वत्याः ससंभ्रमो यो मिथः स्वयंग्रहः प्रियप्रार्थनां विना कंठग्रहणं सुप्सुपेति समासः॥ तेनाश्लेषसुखेन यत्सुखं तेन त्रैलोक्याधिपत्यसुखादु
त्कृष्टेनेति भावः॥ निष्क्रयं प्रत्युपकारनिर्गतिं चकार। निष्क्रयो बुधियोगे स्यात्सामर्थ्ये निर्गतावपि इति वैजयंती॥ यद्वा क्रयणं चकार॥ क्रय्य वा पा
रेण याच्यादैन्यदोषं ममार्जेत्यर्थः॥ अत्र सुरवरप्रदानयोर्विनिमयात्परिवृत्तिरलंकारः॥ ५०॥ ॐ नमो भगवते वासुदेवाय नमः॥ ७॥

पुरीति। बली बलवान् यो रावणः नमुचिद्विषा इंद्रेण विगृह्य विरुध्य पुरीममरावतीमवस्कंद आक्रम रोधय॥ नंदनं तद्वनं लुनीहि छिंधि छेद। इहेत्यपो
रितीकारः। रत्नानि श्रेष्ठवस्तूनि मणीन् वा॥ रत्नं श्रेष्ठे मणावपीति विश्वः। मुषाण मुमोष। मुष स्तेये। हलः श्नः शानज्झाविति शानजादेशः। अमरां
गनाः हर जहार। सर्वत्र पौनःपुन्येनेत्यर्थः इत्थमनेन प्रकारेण। अहनि च दिवि च अहर्दिवं। अहन्यहनीत्यर्थः। अचतुरेत्यादिना सप्तम्यर्थे द्वन्द्वो द्वंद्वस
मासांतो निपातः। दिवः स्वर्गस्य अस्वास्थ्यमुपद्रवं चक्रे। अत्रावस्कंदेत्यादौ क्रियासमभिहारे लोट् इत्यादिना अनुवृत्तौ समुच्चयेऽन्यतरस्यामिति वि
कल्पेन कालसमान्येष्वमात्रादेशो लोटो दूतस्य यथोक्तं प्रयहे सर्वविकारदेशो हि स्वो च प्रकरणादिनालर्थविशेषावस्थानं अतो हेरिति यथायोग्यं हि लुक्।

पुरीमवस्कंद लुनीहि नंदनं मुषाण रत्नानि हरामरांगनाः॥ विगृह्य चक्रे नमुचिद्विषा बली य इत्थमस्वास्थ्यमहर्दिवं दिवः॥५१॥
सलीलयातानि न भर्तुरभ्रमोर्न चित्रमुच्चैःश्रवसः पदक्रमम्॥ अनुद्रुतः संयति येन केवलं बलस्य शत्रुः प्रशशंस शीघ्रताम्॥५२॥

पौनःपुन्ये भृशार्थे वा क्रियासमभिहारः अवस्कंदनादिक्रियाविशेषाणां समुच्चयः क्रियासमभिहारः तस्य सामान्यस्य करोतेः समुच्चये सामान्यवच
नस्यैतस्यानुप्रयोगश्चक्रे इति। अत्र तिङ्‌र्यैवित्र्यात्सौशब्द्याख्यो गुणः सुप्तिङ्‌न्तं च व्युत्पत्तिः सौशब्द्यमिति लक्षणात् समुच्चयश्चालंकारः॥५१॥
सलीलयेति। संयति युद्धे। समुदायः स्त्रियां संयत्समित्याजिसमित्युधः समरः। येन रावणेन अनुद्रुतः अनुधावितः बलस्य शत्रुरिंद्रः अभ्रमोक
रिण्याः भर्तुः ऐरावतस्य सलीलयातानि गंभीरगमनानि न प्रशशंस। तथा उच्चैःश्रवसः स्वाश्वस्य चित्रं नानाविधं पदक्रमं पदविक्षेपं अर्धपुलायितादि

अशक्नुवन्निति। अधीरलोचनो। स्थिरदृष्टिः। कौशिकः महेन्द्रः। उलूकश्च। महेन्द्रगुग्गुलूलूकव्यालग्राहिषु कौशिक इत्यमरः। सहस्रर
श्मेः सूर्यस्येव अस्य रावणस्य विक्रमं कर्मणो दर्शनं सोढुमशक्नुवन् हिमाद्रेर्गुहेव गृहं तस्यान्तरं प्रविश्य बिभ्यत्त्वा पिधेशमान इव बिभ्यतः शी
तरिनुमभावः दिवसानि वासराणि निनाय। घस्रो दिनाहनी वा तु क्लीबे दिवसवासरावित्यमरः। कौशिक इत्यभिप्रायः प्रस्तुतैकगोचरत्वेन भयप्रश्लेषविशेषश्लेषासं
भवात्। उलूकविषयत्वात्स्वशक्तिप्रकाशो ध्वनिः सन्नुसहस्ररश्मे रिवेत्युपमानिर्वाहकत्वादाच्चलिष्यंगं ॥५२॥ बृहच्छिलेति शिलेव निष्ठुरे कंठेयद्दनादभियात्तादिकी

विक्रमं अशक्नुवन्सोढुमधीरलोचनः सहस्ररश्मेरिव यस्य दर्शनं॥ प्रविश्य हेमाद्रिगुहागृहांतरं निनाय बिभ्यद्दिवसानि कौशिकः ॥५३॥
बृहच्छिलानिष्ठुरकंठघट्टनाद्विकीर्णलोलाग्निकणं सुरद्विषः॥ जगत्प्रभोरप्रसहिष्णु वैष्णवं न चक्रमस्याक्रमताधिकंधरं॥ ५४॥ ॥ ६७

र्णाः विक्षिप्ताः लोलाश्चाग्निकणाः स्फुलिंगाः यस्य तत्। अत एवाप्रसहिष्णु अनभिभावुकं प्रसह्य न अभिभवद् इति शृंगिकारः। अलंकृञित्यादिना इष्णु
च। वैष्णवं चक्रं सुदर्शनं जगत्प्रभोः सकललोकैकस्वामिनः अस्य सुरद्विषः रावणस्य कंधरायामधि इति अधिकंधरमधिग्रीवं विभक्त्यर्थेऽव्ययीभा
वः। अव्ययीभावश्चेति नपुंसकलिंगत्वात् ह्रस्वो नपुंसके ह्रस्वत्वं। कंठो गलोऽथ ग्रीवायां शिरोधिः कंधरेत्यपीत्यमरः। नाक्रमत अप्रतिहतं सत् न क्रमते
न वर्तते स्म किंतु प्रतिहतमेवेत्यर्थः। वृत्तिसर्गतायनेषु क्रम इति आत्मनेपदं वृत्तिरप्रतिबंधः ॥५४॥ यथा दीपो निवातस्थो नेंगते सोपमा स्मृता॥

माघ॰टी॰ विभिन्नेति। स रावणो मदेन दर्पेण दानेन च। मदो दर्पेभदानयोरिति विश्वः। दंती गज इव विभिन्नो विघट्टितः शंखो निधिभेदः कंबुश्च येन सः सन्। शंखो
१६ निध्यंतरे कंबुललाटास्थिरनखेषु चेति विश्वः। अकलुषं कलुषं क्षुब्धमाविलं वा भवन्। निरस्तं गांभीर्यमविकारित्वमगाधत्वं च यस्य तत्। अपास्तानि पु
ष्पकाणि पुष्पाणि पुष्पकं विमानं च यस्मात्। पुष्पपक्षे वैभाषिकः कप्रत्ययः। मनुष्यस्येव धर्मः श्मश्रुलत्वादिर्यस्येति स्वामी। तस्य मनुष्यधर्मणो धन
दस्याधर्मादनिच् केवलात्। मानसं चित्तं तदाख्यं सरश्च मानसं सरसि स्वांते इति विश्वः। मुहुर्न प्रकंपयामासेति न किंतु प्रकंपयामासैवेत्यर्थः। कुबे

विभिन्नशंखः कलुषीभवन्मुहुर्मदेन दंतीव मनुष्यधर्मणः॥ निरस्तगांभीर्यमपास्तपुष्पकं प्रकंपयामास न मानसं न सः॥ ५५॥
रणेषु तस्य प्रहिताः प्रचेतसा सरोषहुंकारपराङ्मुखीकृताः॥ प्रहर्तुरेवोरगराजरज्जवो जवेन कंठं सभयाः प्रपेदिरे॥ ५६॥ ॥

रस्य महामहामहिम्नतया संभावितप्रकंपत्वं निवारणाय नञ्द्वयं संभाव्यनिषेधनिवर्तने द्वौ नञाविति वामनः। अत्र दंतिरावणयोः प्रकृताप्रकृतयोः १६
श्लेषः॥ ५५॥ रणेष्विति। किंच रणेषु च प्रचेतसा वरुणेन प्रहिताः प्रयुक्ताः उरगराजाः महासर्पास्त एव रज्जव इव उरगराजरज्जवो नागपाशा इत्यर्थः। तस्य
रावणस्य सरोषहुंकारेण पराङ्मुखीकृताः व्यावर्तिताः अत एव सभयाः सत्यं जवेन प्रहर्तुः प्रयोक्तुः प्रचेतस एव कंठं प्रपेदिरे। अत्र परिहिंसार्थप्रयुक्त
स्यायुधस्य वैपरीत्येन स्वकंठग्रहणादनर्थोत्पत्तिरूपो विषमालंकारः विरुद्धकार्यउत्पत्तिर्यत्रानर्थकस्य वा भवेदिति लक्षणात्॥ ५६॥ श्रीगुरुभ्यो॰

परेतभर्तुरिति। अमुना राजवणेन धनुः शार्ङ्गं विधातुं निर्मातुं उत्खातमुत्पाटितं विषाणयोः शृंगयोर्मंडलं वलयं यस्य स परेतभर्तुः परेतराजस्य महि
षः वाहनभूत इति भावः। भारे विषाणरूपे भ्रत्रो घत्रे। हतेऽपि महतस्त्रपैव भरस्तस्मात् नतोऽप्येनिभरादिति भावः। भृशोकृयादिकालत्र शेरपूप्रस्य
यः। मटानतं शिरः दुःखेन उवाह वहतिस्म। वहेर्लिटि लिट्यभ्यासस्योभयेषामिति संप्रसारणं। हतेऽपि भारे णैन इति विरोधः तदनु प्राणिनाचेयंत्र
वनतिहेतुत्व साधर्म्यात्त्रपयाभरत्वोत्प्रेक्षा॥ ५७॥ स्फुरन्निति। अहः करोतीति अहस्करः सूर्यः दिवाविभेत्यादिना टच् प्रत्ययः। कस्कादित्वात् सत्वं। शुचौ

परेतभर्तुर्महिषोऽमुना धनुर्विधातुमुत्खातविषाणमंडलः॥ हतेऽपि भारे महतस्त्रपाभरादुवाह दुःखेन भृशानतं शिरः॥ ५७॥
स्फुरन्सहस्रांशुः समये शुचावपि स्थितः कराग्रैरसमग्रपातिभिः॥ अघर्मघर्मोदकबिंदुमौक्तिकैरलंचकारास्य वधूरहस्करः॥ ५८॥

समये ग्रीष्मकाले अनुपहतापारे च स्थितोऽपि। शुचिः शुक्रे नुपहते शृंगारापाढयोरपि। ग्रीष्मे हुतवहेऽपि स्यादिति विश्वः। समयाः शपथाचारकालसि
द्धांतसंविद इत्यमरः। असमग्रपातिभिः संकुचितवृत्तिभिरित्यर्थः। कराणामंशूनां हस्तानां च अग्रैः। बलिहस्तांशवः करा इत्यमरः। सहस्रांकं स्फुरन्त्र
विभ्रान्सभयादिति भावः। अघर्मोऽनुष्णा घर्मोदकबिंदवः स्वेदोरविंदवः मंथोदकेत्यादिना विकल्पादुदकशब्दस्योदादेशाभावः। तैरेव मौक्तिकैरस्य वि
धूरलंचकार। योऽपि नद्मयात्रासहितं न पतीत्यर्थः। अत्र प्रस्तुतसूर्यविशेषणमात्रसाम्यादप्रस्तुतप्रसाधकप्रतीतेः समासोक्तिरलंकारः॥ ५८॥ श्रीः॥

विलासिनी। विभ्रमदन्तपत्त्रिका इति पाठः

माघ॰ स॰ १

कलेति। कलाभिः चतुःषष्टिशिल्पविद्याभिश्च समग्रेण संपूर्णेन। कलस्त्रिलिंगविषयो चंद्रांशोकलने कला इति वैजयंती॥ गृहान् मुंचता सदा तन्दुहे स्थैव वसंता। भयदं शासेवा धर्मेवाच्चेति भावः। मनस्विनी। उत्का उत्सुकाः कर्तुमुत्कण्ठितुं उत्क उन्मना इति निपातनात्। उत्कशब्दात् तत्करोतीति ण्यन्तात् तुमुन्। पर्यायस्याभिनोऽभेदश्चतुरेणेत्यर्थः। कुतः रतिं वितन्वता विरचयिता चन्द्रिकाभिश्चतुराक्तिभिश्च रागं पवेयता इंदुना विलासिनो विलसनशीलस्यवो वलसेत्यादिना घिनुण् प्रत्ययः। तस्य रावणस्य नर्मसाचिव्यं क्रीडासंबंध्यपि कारित्वं। क्रीडालीला च नर्म च स्यमरः। नाकारिति न किल कार्यमित्यर्थः। अनौचित्यप्राप्तनर्मसाचिव्यप्रतिषेधनिवारणार्थेन नञ्द्वयं संभाव्यनिषेधनिवर्तनेन नञ्द्वयमिति वामनः। अत्रेन्दोः प्रकृतस्याप्रकृतेन नर्मसाचिव्येन

कलासमग्रेण गृहान्नमुंचता मनस्विनीरुत्कयितुं पटीयसा॥ विलासिनस्तस्य वितन्वता रतिं न नर्मसाचिव्यमकारि नेंदुना॥ ५९॥
विदग्धलीलोचितदंतपत्त्रिका विधित्सया नूनमनेन मानिना॥ न जातु वैनायकमेकमुद्धृतं विषाणमद्यापि पुनः प्ररोहति॥ ६०॥

श्लेषः॥ ५९॥ विदग्धेति। मानिना अहंकारिणा अनेन रावणेन विदग्धलीलाश्चतुरविलासिन्य इत्यर्थः। तासामुचिता विलासिनीविभ्रमदंतपत्त्रिकेति साधीयान् इति साधीयान् पाठः। अन्यथा विप्रकृष्टार्थप्रतीतिकत्वेन क्लिष्टार्थाख्यादोषोपपत्तेः। क्लिष्टं तदर्थो यत्र दूरात्प्रत्ययो भवेदिति लक्षणात्। विलासिनां यादंतपत्त्रिपत्त्रिका विभ्रमार्थानि यानि दंतपत्राणि॥ विभ्रमदंतशब्दयोः षष्ठीसमासः। पर्यवसानानादर्थलाभः। तासां विधित्सया विधातुमिच्छया विपूर्वाद्धातेः स निमीमत्यादिना अचश्च सः अतलोपोऽभ्यासस्येत्यभ्यासलोपः। ततः स्त्रियामप्रत्ययादित्यकारप्रत्यये टाप्। नूनं जातु कदाचिदपि कदाचिज्जातु सार्द्धं विस्मरः।

१७

निशांतेति। निशांतं गृहं। निशांतं गृहशांतयोरिति विश्वः। तत्रनार्यः शुद्धांतस्त्रिय इत्यर्थः। तासां परिधानानि अंतरीयाणि अंतरीयोपसंव्यानपरिधा
नान्यधोंशुके इत्यमरः। तेषां धूननं चालनं। धूञो ण्यंतात्ल्युट्। धूञ्प्रीञोर्नुग्वक्तव्य इति नुक्। तेन स्फुटागसा व्यक्तापराधेनापि। अंतःपुरद्रोहस्य महा
परोधत्वादिति भावः। प्रकंपनेन वायुना अनपराधे अपराधाभावेपि बाधिताः राजपुरुषैरिति शेषः सुराः अनुचकंपिरे। स्वयमुपाये नांतः प्रवि
श्य अनपराधबाधानिवेदनेन मोचयिता वायुना अनुकंपिता इत्यर्थः। एकस्यैव वैदग्ध्यात् बहवो जीवंतीति भावः।। ६३।। तिरस्कृत इति। किंच तस्य राव

निशांतनारीपरिधानधूननस्फुटागसाप्यूरुषु लोलचक्षुषः।। प्रियेण तस्यानपराधबाधिताः प्रकंपनेनानुचकंपिरे सुराः।। ६३।।
तिरस्कृतस्तस्य जनाभिभाविना मुहुर्महिम्ना महसां महीयसां।। बभार बाष्पैर्द्विगुणीकृतं तनुस्तनूनपाद्धूमवितानमाधिजैः।। ६४।। ।। म

णस्य जनाभिभाविना लोकतिरस्कारिणा महीयसा अतिमहतां महसां महिम्ना महत्त्वेन पृथ्वादिभ्य इमनिज्वेति इमनिच् प्रत्ययः। मुहुः तिरस्कृतः अत
एव तनुः कृशः तनूनपातयतीति जाठररूपेण शरीरं धारयतीति तनूनपाद्वह्निरिति स्वामी। नभ्राडादिसूत्रेण निपातनात् नञो नलोपाभावान्नः आधिजैः
दुःखोत्थैः बाष्पैः निश्वासोष्मभिः बाष्पो नेत्रजलोष्मणोः पुंस्याधिर्मानसी व्यथेति विश्वामरौ। द्वौ गुणौ आवृत्ती यस्य तत् द्विगुणं। ततः च्विः। द्विगुणीकृतं द्विरावृत्तं।
गुणस्त्वावृत्तिशब्दादिज्येंद्रियामुख्यतंतुष्विति वैजयंती। धूमवितानं धूमवितानं धूममंडलं बभार। अग्निरपि तस्य सन्निधौ निस्तेजस्कः धूमायमान आस्ते इत्य
र्थः। धूमैहेगुण्यासंबंधे संबंधाभिधानादतिशयोक्तिः।। ६४।।

मा॰ स॰ १

२९ परस्येति। किंच इद्धं दीप्तं उग्रमित्यर्थः। इंधी दीप्तौ कर्त्तरि क्तः। तं रावणमाराधयितुं सेवितुं परस्य स्वेतरस्य कर्माणि हृदयादिजीवस्थानानि कुलाचारान्
व्रणानि च विध्यति भिनत्तीति मर्मावित् परमार्माणहं तेति यावत्। विध्यतेः क्विप्। ग्रहिज्येति संप्रसारणं नहिवृती त्यादिना पूर्वस्य दीर्घः। तं मर्माविदं नि
जं स्वकीयं द्विजिह्वतां दोषं सर्पत्वे यो दोषो दृष्टिविषयत्वाशीविषत्वादि तं अन्यत्र द्विजिह्वतापिशुनता द्विजिह्वौ सर्पसूचको विसमरः। सैव दोषस्त
मुत्सृजतां फणिनां संबंधिभिः अजिह्मगामिभिः करचरणादिमत्त्व इह धारित्वादृजुगतिभिः अकपटचारिभिश्च तथा कर्णाभ्यां सह वर्तन्त इति सक
र्णकाः तैः चक्षुःश्रवत्वं विहायाविकृतकर्णैरित्यर्थः। तेन सहेति तुल्ययोग इति बहुव्रीहिः। शेषाद्विभाषेति कप्। अन्यत्र कर्णयति सर्वं शृणोतीति सक

परस्य मर्माविधमुत्सृजतां निजं द्विजिह्वतादोषमजिह्मगामिभिः॥ तमिद्धमाराधयितुं सकर्णकैः कुलैर्न भेजे फणिनां भुजंगता॥ ६३॥
तदीयमातंगघटाविघट्टितैः कटस्थलप्रोषितदानवारिभिः॥ गृहीतदिक्कैः पुनरन्यवर्तिभिश्शिरायथार्थ्यमलंभि दिग्गजैः॥ ६४॥

र्णकोनियंताकर्णयते र्ण्वत्। ततः पूर्ववत्समासे सकर्णिकैः सनियामकैरित्यर्थः। कुलैः। वर्गैः भुजंगतासर्पतानाविरुद्धेव। भुजंगो विटसर्पयोरि तिहलायुधः। न

कौटिल्येन भेजे स्वकृता। भुजेनगच्छतीति भुजंगः। गमेः सुपिस्य च खच्। सडिह्वा तस्मिन्नियंतरि विखलैः खलत्वमपि सर्पैः सर्पत्वमपि विहायवेषभाषाक्रियाभिः सौम्यात्वं
श्रियत इत्यर्थः। अत्र प्रस्तुतसर्पविशेषणसाम्यात् अप्रस्तुतखलव्यवहारप्रतीतेः समासोक्तिः॥ ६३॥ तदीयेति। तदीयमातंगानां घटाभिर्व्यूहैः विघट्टितैरभिगम्ना
नां घटनाघटेस्य परः। अतएव कटस्थलेभ्यः प्रोषितान्यपगतानि दानवारीणि येषां तैः गृहीताप फलाय्यसंश्रिताः दिशो यैस्तैर्गृहीतदिक्कैः शेषाद्विभाषेति कप्॥

मिहतैः

२८

अभीक्ष्णमिति॥ उष्मणा सह स्मरज्वरेणेति सोष्मणः सदाहस्य तस्य रावणस्य वपुः अभीक्ष्णं भृशं आमुष्मैरपि। शोकादिति भावः॥ सुरेंद्रस्य बंधः। बंदीकृ
ताः स्त्रियः ताः संश्वसितानिलैः निश्वासमारुतैः। यथा निर्वेदो निर्वेदवारं निर्वाणं निवृत्तौ मोक्ष इति वैजयंती॥ तथा च संदनाभः कणाः चंदनोदकबिंदु
सहितास्तैः चंदनोदकैः आमलाः मृदुलाश्च तैः जलार्द्रेणां जलोक्षितताल वृंतानां पवनैः निर्निर्वेदौ। पवित्रं तालवृंतं स्याद् उत्क्षेपे व्यजनं च तत्। जलार्द्रं स्याज्जलेना
र्द्रमिति वैजयंती। अत्र संततसेव्योपचारं विनानिवृत्तिरिति कारणविरुद्धकार्योत्पत्तिरूपो विषमालंकारः॥ ६५॥ तपेनेति। सदानित्यं न तु यथा

आभीक्ष्णमुष्मैरपि तस्य सोष्मणः सुरेंद्रबंदीश्वसितानिलैर्यथा॥ सचंदनांभःकणकोमलैस्तथा वपुर्जलार्द्रापवनैर्न निर्ववौ॥ ६५॥
तपेन वर्षाः शरदा हिमागमो वसंतलक्ष्म्या शिशिरः समेत्य च॥ प्रसूनकॢप्तिं दधतः सदर्तवः पुरेऽस्य वास्तव्यकुटुंबितां ययुः॥ ६६॥

कालं प्रसूनकॢप्तिं पुष्पसंपत्तिं दधतः धारयंतः ऋतवः वर्षाः प्रावृट् तपेन ग्रीष्मेणा उष्म उष्मागमस्तपः स्त्रियां प्रावृट् स्त्रियां भूम्नि वर्षा अथ श
रत् स्त्रियामित्यमरः। तथा हिमागमो मंतः शरदा तथा शिशिरो वसंतलक्ष्म्या च समेत्य मिथुनीभावेन मिलित्वा अस्य रावणस्य पुरे वसंतीति वास्त
व्या वस्तारः। वसेस्तव्यत् कर्तरि णिच्चेति कर्तरि तव्य इति प्रत्ययः। कुटुंबिनश्च ततो ययुः समेत्य ययुरिति समुदायस्य मुदायिनो रंभे
दविवक्षया समानकर्तृकत्व अत्र पुरे युगपत्सर्वर्तुसंबंधाभिधानात् असंबंधातिशयोक्तिः॥ ६६॥ गोविंदगोविंद हरे मुरारे गोविंदगो०

सचायमास्त्रविनाशास्तुभ्यमपियुध्यापुनस्त्वयैवहतइतिसुग्मेनाह।अमानवमिति।मनोरयंमानवः।तस्येदमित्यण्प्रत्ययेपर्यवसानाज्जा
तावेकवचनं।अन्यथामनोर्जातावित्येवस्यात्।अमानवममानुषं।नजायतेइत्यजं।अन्येष्वपिदृश्यतइतिडप्रत्ययः।तथापिमनोःकुलेजातंश
मरूपेणउत्पन्नमितिविरोधः।सचाभासत्वादलंकारइत्याह।प्रभावितमिति।महानुभावेतस्मिन्नकश्चिद्विरोधइतिभावः।आभीक्ष्ण्येणिनिरितिणि
निःप्रयोमत्वर्थीयः।भवंतमितिशेषः।आत्मनःस्वस्यअंतंकरोतीतितत्।अंतशब्दात्करोतीतिण्यंतात्पचाद्यच्।भविनंभविष्यंतंभविष्यति
गम्यादयः।जानन्नपियोरावणःजनकस्यापत्यंस्त्रीजानकीसीतांनमुमोच।अमुमित्युत्तरश्लोकेनान्वयः।जानतोप्यमोचनेमानित्वंकारणमि
अमानवंजातमजंकुलेमनोःप्रभाविनंभाविनमंतमात्मनः।।मुमोचजानन्नपिजानकींनयःसदाभिमानैकधनाहिमानिनः।।६७।। स्मर
स्यदेशाशरथिर्भवन्भवानमुंवनांतेवनितापहारिणं।।पयोधिमाविद्धचलज्जलाविलंविलंघ्यलंकांनिकषाहनिष्यति।।६८।। श्रीगोविंदंभजेतं।।
त्याहामानिनःसदाप्राणात्ययेपिअभिमानएवएकंमुख्यंधनंयेषांतेप्राणात्ययेपिनमानंमुंचंतीत्यर्थः।।कारणेनकार्यसमर्थनरूपोर्थांतरन्यास
।।६७।।स्मरतोतिभाषानुभावेउवतुःदशरथस्यापत्यंदाशरथिः।अतइञ्।भवन्रामःसन्नित्यर्थः।भवतेर्लटःशत्रादेशः।वनांतात्सकारण्याद्वनिता
पहारिणंसीतापहारिणंवीरममुंरावणं।आविद्धाक्षिप्तासेतुबंधनेअद्रिभिःहतानि।अतएवचलंतिजललानियस्यसः।अतएवाविलःअनुपयोधिंविलं
घ्यलंकांनिकषालंकासमीपेसमयानिकषाशब्दौसामीप्येअव्ययेमताविति।हलायुधः।अभितःपरितःसमयानिकषाहादितेप्रतियोगेद्वितीयेपि

अथेति॥ अथ राक्षसदेहत्यागानंतरं संप्रति छलनापरः परप्रतारणापरः एषः रावणः शैलूषः नटः भूमिकां रूपांतरमिव। शैलूषेण रमिलुषोः।
भूमिकारचयांस्यान्मूर्त्यंतरपरियह इति विश्वः अपरमुपपत्तिं भवांतरमित्यर्थः। अत्राथ शिशुपालसंज्ञया तिरोहितात्मा तिरोहितस्वरूपः सन् सोपि
रावण एव सन्नपि नरैरितरैः स न भवतीत्यर्थः॥ न तस्मादन्य एव। नञिसमासः एतत्तदोः सुलोपोकोरनञ्समासे हलीति नञ्समासे सुलोपाभावः॥
प्रतीयते प्रतिप्रबोद्धिणः कर्मणि लट्। यथा एव शैलूषः रूपाद्रूपांतरमास्थाय नचदेशभाषादिभिः अन्य इव भाति तद्वदयमपि मानुषदेहपरियहात् अन्य

अथोपपत्तिं छलनापरोपरामवाप्य शैलूष इवैष भूमिकां॥ तिरोहितात्मा शिशुपालसंज्ञया प्रतीयते संप्रति सोप्यसः परैः॥६९॥ स बाल आसीद्वपुषा च
तुर्भुजो मुखेन पूर्णेन्दुनिभस्त्रिलोचनः॥ युवा कराक्रांतमहीभृदुच्चकैरसंशयं संप्रति तेजसा रविः॥७०॥ श्रीगोविंदहरे मुरारे॥ ॥

इव भातीनिदोजेन्येनु देवेश्वरेयं संहार्य इति भावः॥६९॥ अथैतद्दोर्जन्यं त्रिभिः रविः करोति। स इति। स शिशुपालो बालः सन् वपुषा चतुर्भुजो भुजचतुष्ट
यवानासीत् विष्णुरिति ध्वनिः। तथा मुखेन पूर्णेंदुनिभस्तत्तुल्यः त्रिलोचनो लोचनत्रयवानासीत्। विशेषणात् संप्रति तत्सर्वं तिरोहितमिति भावः संप्रति तु युवा
सन् करेण बलिना आक्रांतमहीभृत् अधिष्ठितराजकः सन् अन्यांश्च भुव्या शैलः। बलिहस्ताश्रावः करा इत्यमरः उच्चकैः तेजसा रविः असंशयं संशयो नास्तीत्य
र्थः। अर्थाभावेऽव्ययीभावः। वपुषा मुखेन चेति येनांगविकारः इति तृतीया हीनवदाधिक्यस्यापि विकारत्वात्। यथाक्ष्णा वामनः। हीनत्ववदाधिक्यमप्यंगानां वि
विकार इति। तेजसेति प्रकृत्यादिभ्य उपसंख्यानमभिन्नतृतीया। कराक्रांतेत्यादिश्लेषानुप्राणितेयमुत्प्रेक्षा। रविरसंशयमिति तस्य पूर्णेंदुनिभ इत्युपमया संस

[illegible] ॥ ३७ ॥

मा॰ स॰ १

स्वयमिति ॥ यदृच्छया स्वयं स्वस्मा मर्थ्येन न तु देवताप्रसादबलादित्यर्थः ॥ सुरदैत्यरक्षसां देवदानवयातुधानानां अनुग्रहावग्रहयोः प्रसादनिग्रहयोः विधाता कर्ता असौ शिशुपालः अभिराद्धाभिः आराधिताभिः ईश्वराभिः वितीर्णो दत्तो वीर्यातिशयः प्रभावातिशयो येषां तान् दशाननादीन् हसति। अनन्यप्रसादलब्धैश्वर्यं मयि कथं याचकैस्तुल्यतेति गर्वोऽस्य सर्वत्रेत्यर्थः ॥ ७१ ॥ बलेति। जिगीषुणा जिगीषोत्साहवतेत्यर्थः। तेन शिशुपालेन बलावलेपात् बलगर्वात् अधुनापि पूर्ववत् पूर्वजन्मनीव जगत् प्रबाध्यते। तथाहि। सती पतिव्रता योषिदिव सुनिश्चला अतिस्थिरा प्रकृतिः स्वभावो भवान्तरेष्वपि पुमांसमभ्येति। पतिं यानाचरति। मनोवा

स्वयं विधाता सुरदैत्यरक्षसामनुग्रहावग्रहयोर्यदृच्छया ॥ दशाननादीनभिराद्धदेवतावितीर्णवीर्यातिशयान्हसत्यसौ ॥ ७१ ॥ बलावलेपादधुनापि पूर्ववत्प्रबाध्यते तेन जगज्जिगीषुणा ॥ सतीव योषित्प्रकृतिः सुनिश्चला पुमांसमभ्येति भवान्तरेष्वपि ॥ ७२ ॥ तदेनमुल्लंघितशासनं विधे विधेहि कीनाशनिकेतनातिथिं ॥ शुभेतराचारविपक्त्रिमापदो निपातनीया हि सतामसाधवः ॥ ७३ ॥

क्कायसंयता। साभस्तु लेखिमाप्राभिसद्भिः साध्वीति वो व्यतश्रुतिम नुः। उपमा उपमेयपुरस्कृतो ऽर्थान्तरन्यासः ॥ ७२ ॥ तदिति। तत्तस्माद्धेतोर्विधातुरपि उल्लंघितशासनं स्वयं विधातेत्यादि उक्तरीत्या ऽतिक्रान्तदेवाज्ञमित्यर्थः ॥ सापेक्षत्वेपि गमकत्वात्समासः एनं शिशुपालं कीनाशनिकेतनस्य कृतान्तसदनस्यातिथिं विधेहि मारयेत्यर्थः कीनाशः कर्षके क्षुद्रे कृतान्तोपांशुघातिनोरिति विश्वः। न चैतत्साशुचिकहस्तेनस्वयं मारणं भवद्दशा मवश्यकर्त्तव्यमित्याह। शुभेतराचारेण दुराचारेण विपक्त्रिमा दुराचारेण निर्वृत्ताः कालपरिपाकेन प्राप्ताः आपदो येषां तेन तथोक्ताः ॥ तः क्त्रिरिति पचेः क्त्रि प्रत्ययः क्त्रेर्मम्नित्यमिति नित्यो मम प्रत्ययः असाधवो दुष्टाः सतां भवादृशां जगन्नियन्तॄणां निपातनीयाः वध्या हि न वने घृण्यदोषः

२०

रिति॥पुनः नभस्वतः वायोः आघट्टनया आघातेन घृष्यगसंकीर्णरणद्भिः ध्वनद्भिः अनुरणनात्मकोसद्यमाने इत्यर्थः॥ श्रुत्वा लब्ध्वमनुरणनं
लक्षणात्॥ तदुक्तं॥ रत्नाकरे श्रुत्यनंतरभावियः स्निग्धोनुरणनात्मकः स्वरो रंजयते श्रोतुश्चित्तं सस्वर उच्यते इति श्रुतिनामस्वरात्मकावयवः शब्दविशेषः॥
नथमं श्रवणाच्छब्दः श्रूयते ह्रस्वमात्रकः सा श्रुतिः संपरिज्ञेया स्वरावयवलक्षणेति विभिन्नानि प्रतिनियतसंख्यायां [illegible] नानि श्रुतीनां मंडलानि समूहः ये
विभिन्नश्रुतिमंडले श्रुतिसंख्यानियमे देवलः चतुश्चतुश्चतुश्चैव षड्जमध्यमपंचमाः॥ द्वे द्वे निषादगांधारौ त्रिस्त्री ऋषभधैवतौ स्वराः षड्जादयः प्रोक्तलक्षणात्
क्तं॥ श्रुतिभ्यः स्युः स्वराः षड्जर्षभगांधारमध्यमाः पंचमो धैवतश्चाथ निषाद इति सप्त मे तेषां संज्ञाः सरिगमपधनि सप्त रामते तिलेः स्वरैः स्फुटिभवंत्यो ग्रामविशेषाणां
ड्जाद्यपरनामकानां स्वरसंघातभेदानां त्रयाणां मूर्छना स्वरारोहावरोहक्रमभेदः यस्यास्तां महती निजवीणां विश्वावसास्तु बृहती तुंबरोस्तु कलावती महती नार
॥ रणद्भिराघट्टनयान भास्वतः पृथग्विभिन्नश्रुतिमंडले स्वरैः॥ स्फुटीभवद्ग्रामविशेषमूर्छनामवेक्ष्यमाणं महतीं मुहुर्मुहुः॥ १०॥
दस्यस्यात्सरस्वत्यास्तु कच्छपीति वैजयंती। मुहुर्मुहुरवेक्षमाणं तं त्रियोजनभेदलक्षणमाहिम्ना पुरुषप्रयत्नमंतरेणैवाविसंवादध्वननीति कौतुकादनुसंधानमि
त्यर्थः॥ अथ ग्रामलक्षणं यथा कुटुंबिनः सर्वे प्येकीभूता भवंति हि स्वराणां संदोहो ग्राम इत्यभिधीयते षड्जग्रामो भवेदादौ मध्यमग्राम एव च गांधारग्राम इत्ये
तद्ग्रामत्रयमुदाहृतमिति तथा च नंद्यावर्तो थ जीमूतो सुभद्रो ग्रामकास्त्रयः षड्जमध्यमगांधारास्त्रयाणां जन्महेतवः अथ मूर्छनालक्षणं क्रमात्स्वराणां सप्ता
नामरोहश्चावरोहणं मूर्छनेत्युच्यते ग्रामस्था एताः सप्तसप्तच ग्रामत्रयेपि प्रत्येकं सप्तसप्त च मूर्छना इत्येकविंशति मूर्छना भवंति नामानि तु नानपे
क्षितमुच्यते इति प्रतिज्ञाभंगभयान्नलिख्यंत इति सर्वमवदातं अतः पुंव्यापारमंतरेण स्वराद्याविर्भावो न्यः कोपि लोकातिगः शिल्पः सोष्टातिशयो वी
णायाः प्रतीयते तेन सह स्वते: शिष्टातिशयोस्याभेदेनाध्यवसितत्वात् तन्मूलातिशयोक्तिरलंकारः॥ सा च महत्याः पुंव्यापारं विना मूर्छना
द्यसंबंधे पि संबंधनात्॥ असंबंधे संबंधरूपनयाच पुंव्यापाराख्यरूपकारणं विना मूर्छनादिकार्योत्पत्ति द्योतनाद्विभावनाव्यज्यत इत्यलंकारेणालंका

सं॰टी॰क॰ ॥ ०८ ॥ सं॰टी॰क॰

स॰१ निवर्त्येति॥अतींद्रियाइंद्रियमतिक्रांतादेशकालस्वरूपाणि प्रकृष्टार्थाः अत्यादयः क्रांताद्यर्थे द्वितीययेति समासः द्विगुप्राप्तापन्नालंकारपूर्वगतिसमासेषु परलिंगताप्रति
षेधो वक्तव्य इति विशेष्यलिंगत्वं तेषां ज्ञानं तस्य निधिः सर्वार्थदृष्टेत्यर्थः॥सनारदः कृतानतीनू कृतप्रणामान् अनुव्रजतोनुगच्छतः नभसीसिदंतिगछंतीति नभःसदःसुरा
न्सत्सूद्विषेत्यादिना क्विपू निवर्त्य प्रतिप्रयाप्य आसादिताः विनाशिताः दैत्यसंपदो येन तस्य चक्रिणो हरेः महेंद्रस्यालये भवनतट्यां चारुपदं स्थानं समासदत्॥प्राप
त्॥सीददेर्लुङ् पुषादित्वादङ् तन्ननतीति पदच्छेद पदमिति द्वयोर्व्यंजनयुग्मयोरसकृदावृत्त्या छेदनानुप्रासः॥अन्यत्र व्यत्यनुप्रासारोरितिसंसृष्टिः॥११॥पतदिति॥
पतत्सतंगः सूर्यः संप्रतिमोपमानं यस्य सः॥पतंगः पक्षिसूर्ययोरित्यमरः॥तपोनिधिर्मुनिरस्य हरेः भुवि पुरः प्रदेशे यावन्नव्यलीयत नातिष्ठत्तल्लिङ् गतावितिधा

॥निवर्त्यसोनुव्रजतः कृतानतीनतींद्रियज्ञाननिधिर्नभःसदः॥समासदत्सादितदैत्यसंपदः पदं महेंद्रालयचारुचक्रिणः॥ ११॥श्री॥

॥पतत्सतंगप्रतिमस्तपोनिधिःपुरोस्य यावन्न भुवि व्यलीयत॥गिरेस्तडित्वानिव तावदुच्चकैर्जवेन पीठादुदतिष्ठदच्युतः॥ ॥१२॥ ॥

दैवादिकात् कर्तरि लङ् तावदच्युतो गिरेः शैलात्तडित्वान्मेघ इव तडिदुपधायश्चमतोर्वा यवादिभ्य इति मनुपो मकारस्य वकारः॥तत्सोमत्वर्थ इति भ
ायामेकसंज्ञाधिकारेण अपदत्वान्न जस्त्वं॥उच्चकैः उन्नतात् पीठात् जवेनोदतिष्ठत् मुनिचरणस्य भूस्पर्शात् प्रागेव स्वयं उत्थितवान् ऊर्ध्वं प्राणा ह्युत्क्रामंती यूनः
वर्षआगते प्रत्युत्थानाभिवादाभ्यां पुनस्तान् प्रतिपद्यत इति शास्त्रमनुसरन्निति भावः॥उदोनूर्ध्वकर्मणि नियमादिहाप्यूर्ध्वकर्मण्यात्मनेपदं पतत्
प्र पतंगस्य पतनासंभवादियमभूतोपमेत्याचार्यदंडिप्रभृतयो बेणुः अतएव मेवाप्रसिद्धस्योपमानत्वायोगाद् उत्प्रेक्षेत्यालंकारिकाधुनिकाः
र्गयंति॥१२॥श्रीरामचंद्रो लक्ष्मण शीता हनुमंतन्नृसिंहः स्वामी सहायं॥श्रीनृसिंहायनमो नम इति अहर्निशं मनसा स्मरन्नश्रीशुभवेत्

किंच एवं दुष्टनिग्रहे शिष्टानुग्रहः स्यादित्याह ॥ हृदयमिति ॥ अरिवधोदयात् रिपुनाशलाभात् उपोढद्रढिम नैश्चिन्त्यात् धृतदार्ढ्यं स्वस्थमिति यावत् पृ
थ्वादित्वात् दृढशब्दात् इमनिच् प्रत्ययः र ऋतो हलादेर्लघोरिति ऋकारस्य रेफादेशः । पुरः शत्रुपुराणि दारयतीति पुरंदरः इंद्रः पूः सर्वयोर्दारिसहोरिति
खच् प्रत्ययः खचि ह्रस्वः इत्युपधाया ह्रस्वः वाचंयमपुरंदरौ चेति निपातनात् अदंतत्वं मुमागमश्च । तस्य हृदयं पुनर्भूयोपि पूर्ववदेवेति भावः घनपुलकयोः सांद्ररो
मांचयोः पुलोम्नो जाता पुलोमजा शची तस्याः कुचाग्रयोः द्रुतपरिरंभ औत्सुक्यात् शीघ्रालिंगनं तत्र यन्निपीडनं तस्य क्षमत्वं सहत्वं दधातु शाक चित्तविक्षेपात् तस्या
भोगे न शक्रेण संप्रति तत्प्रसादान्निष्कंटकं स्वकं राज्यं भुज्यतामित्यर्थः । अत्र दार्ढ्य — स्योदृढद्रढिमेति विशेषणगत्या निपीडनक्षमत्वं प्रति हेतुत्वोक्त्या पदार्थहेतुकं

हृदयमरिवधोदयादवाप्तद्रढिम दधातु पुनः पुरंदरस्य ॥ घनपुलकपुलोमजाकुचाग्रद्रुतपरिरंभनिपीडनक्षमत्वं ॥७४॥

काव्यलिंगं हृदयनिपीडनक्षमत्वसंबंधेप्यसंबंधोक्त्या संबंधे संबंधरूपातिशयोक्तिरित्यर्थो लंकारो वृत्त्यनुप्रासश्च संसृज्यते पुष्पिताग्रावृत्तं । अयुजि नयुगरेफ
तो यकारो युजि च नजौ जरगाश्च पुष्पिताग्रा इति लक्षणात् ॥७४॥ ओमिति । तस्मिन् सुरमुनौ नारदे इतीत्थंभूतां वाचं व्याहृत्योत्कानभउत्पत्ति तेरवमुकते पुरंदरे यो इंद्रोः श्रि
यं विभ्रति सति । अथ मुनिवाक्यानंतरं ओमित्युक्तवतस्तथास्त्वित्यंगीकृतवतः ओं प्रश्नेंगीकृतौ रोषे इति विश्वः । चेदीनां जनपदानां राजा वैद्यः शिशुपालः इह लोके सो
दा जांधूढः तिचतुः प्रत्ययः तं मति कुधस्य पूर्णीः णो वदने ओमेव अनिशं सर्वदा अव्यभिचारेणेत्यर्थः । शत्रूणां विनाशस्य पिशुनः सूचकः । चंद्रे अभ्युदिते केतुः सि
तीशुनां विनाशं दैदिति शास्त्रदिति भावः केतुरुत्पातविशेषः । केतुर्द्युतौ पताकायां ग्रहोत्पाताभिलक्ष्मसु इत्यमरः भ्रुकुटीछलेन भ्रूभंगव्याजेन तस्य प्रतिदं

मा॰टी॰१ चकार आस्पदं प्रतिष्ठायामिति निपातनात्सुडागमः अनेन वाक्यार्थभूतवीररससहकारिणो रौद्रस्य स्थायी क्रोधः स्वानुभावेन भ्रुकुट्या

२९ कारणभूतोनुमेय इत्युक्तं तथा तद्विनाभूतस्यांगिनो वीरस्यापि स्थायि यत्र भोपरनीयकः उत्साहे इत्युक्त एवेत्यनुसंधेयं इंदोः श्रियं बिभ्रति

अत्र इंदुमुनेरिंदुश्रियो गानस्य हृद्योभ्मति साहश्यापेक्षाद्संभवद्वस्तुसंबंधरूपो निदर्शनालंकारः वदने व्योम्नीवेत्युत्प्रेक्षा भ्रुकुटिच्छलेन केतु

रिति छलादिशब्देनासत्वप्रतिपादनरूपोपन्हवः तत्र शत्रुविनाशसूचकेत्वपक्षे तेदु स्रान्निध्याभावस्थानसंपादकत्वेन निदर्शनोपमयो

ओमित्युक्तवतोथ शार्ङ्गिण इति व्याहृत्य वाचं नभस्तस्मिन्नुत्पतिते पुरः सुरमुनाविंदोः श्रियं बिभ्रति शत्रूणामनिशं विनाशपिशुनः

क्रुद्धस्य चैद्यं प्रति व्योम्नीव भ्रुकुटिच्छलेन वदने केतुश्चकारास्पदं ॥ ७५ ॥ इति शिशुपालवधे श्र्यंके नारदाभिगमनो नाम सर्गः समाप्तः ॥ १ ॥

रपन्हवोपकारकत्वादंगांगीभावेन संकरः चमत्कारितया मंगलाचरणरूपकतया सर्गांत्यश्लोके श्रीशब्दप्रयोगः यथाह भगवान्भाष्यकारः २१

मंगलादीनि मंगलमध्यानि मंगलांतानि हि शास्त्राणि प्रथंते वीरपुरुषाण्यायुष्मत्पुरुषाणि च भवंति अध्येतारश्च वक्तारो भवंतीति शार्दूलविक्री

डितं वृत्तं सूर्याश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितमिति लक्षणात् सर्गांते वृत्तभेदः यथाह दंडी सर्गैरनतिविस्तीर्णैः श्राव्यवृत्तैः सुसंधि

भिः सर्वत्र भिन्नवृत्तैरुपेतं लोकरंजकमिति ॥ ७५ ॥ विनामकथनं महाकाव्ये इति महत्त्वेन लक्षणसंपत्तिः सूचिता शिशुपालवधा इति का

ति॥ अथाच्युतोत्थानानंतरं धातुः सुतेन प्रयत्नोन्नमितोस्तथापि मुनिपादभाराक्रांतं मतः फणायेषां तैः फणीनां गणेरथोऽधःप्रदेशात्कथंचित्तध्वनेरुत्था
वस्तले भूपृष्ठे अभिदेवकीसुतलक्षणेनाभिप्रति आभिमुख्य इत्यव्ययीभावः॥ चरणोन्यधायिषातां निहतोऽधातेः कर्मणि लुङ् स्यसिच् सीयु
ड़ादिना चिण्वदिति॥ शुक्र अत्र फणानाम नमनोन्नमनासंबंधोपि मुनिगौरवायत्तसंबंधाभिधानादतिशयोक्तिः॥१३॥ तमिति॥ आदिपुरुषः
येभ्योपि दृश्यत इति यादीर्घः सकर्मअर्घ्यपूजामर्हतीत्यर्घ्यः दंडादिभ्यो यः तं नारदं पूजार्थं द्रव्यमर्घ्ये पादाभ्यां चेति यत्प्रत्ययः॥ मौल्ये पूजाविधावर्घ्य

अथ प्रयत्नोन्नमितो नमत्फणैर्धृते कथंचित्फणिनां गणैरधः॥ न्यधायिषातामभिदेवकीसुतं सुतेन धातुश्चरणौ भुवस्तले॥ १३॥
तमर्घ्यमर्घ्यादिकयादिपूरुषः सपर्यया साधु स पर्यपूपुजत्॥ ग्रहानुपैतुं प्रणयाद्भीप्सवो भवंति नापुण्यकृतां मनीषिणः॥ १४॥

विश्वंभरः॥ अर्घ्यमादिर्यस्याः सा तया अर्घ्यादिकया शेषाद्विभाषितकप्रत्ययः॥ सपर्यया पूजया पूजनमस्यापचितिः सपर्यार्चार्हणा समाः इत्य
मरः॥ ~~अर्घ्यमादिर्पूजापूजत्~~॥ परिपूजितवान्॥ णौ चङि लुङ् तं कर्तव्यं चैतदित्यार्थांतरं न्यस्यति ग्रहानिति मनस ईषिणो मनीषिणः संतः पृ
षोदरादित्वात्साधुः अपुण्यकृताम पुण्यकृतवतां॥ सुकर्मपापमंत्रपुण्येषु कृञ इति भूते क्विप्॥ गृहान् प्रणयादुपेतुमभीप्सवोभ्याप्तुमि
च्छवः आप्नोतेः सन्नंताद् उप्रत्ययः॥ आप्ज्ञप्यृधामीदिति ईत इकारः न भवंती॥ किंतु पुण्यकृतामेव अलभ्याः सतः पूजार्हस्सर्थः॥ १४॥

नेति॥ उत्थितावेतौ मुनिकुम्भोजनः तुषाराजनयोः पर्वताविव यावत् नोदपश्यत् नोत्प्रेक्षितवान् तावच्चिरंभवः चिरंतनः पुराणो मुनिः कृष्णः पुरा किल
भगवान् बदरिकारण्ये नारायणावतारेण तपसि स्थितवान् इति पुराणात् सायं चिरं इत्यादिनाद्युप्रत्ययः॥ तुडागमश्च स्वहस्तेन दत्ते आसने मुनिना रदं अ
भिन्यवीविशत् स्वाभिमुख्येनोपवेशितवान् विशतेर्णौ चङ्॥१५॥ महेति॥ महत्याः महानीलशिलायाः सिंहलीद्वीपसंभवेंद्रनीलोत्पलस्य रुगिव रुक्
यस्य इत्युपमालंकारः॥ सिंहलस्याकरोद्भूता महानीलास्तु ते स्मृता इति भगवान् अगस्त्यः कंसकृषः कृष्णस्य पुरोऽग्रे उच्चैः विष्टरे आसने

॥ नयावदेतावुदपश्यदुत्थितौ जनस्तुषाराञ्जनपर्वताविव॥ स्वहस्तदत्ते मुनिमासने मुनिश्चिरंतनस्तावदभिन्यवीविशत्॥१५॥
॥ महामहानीलशिलारुचः पुरो निषेदिवान् कंसकृषः सविष्टरे॥ श्रितोदयाद्रेरभिसायमुच्चकैरचूचुरच्चंद्रमसोऽभिरामतां॥१६॥

श्रासनयोर्विष्टरइति षत्वं निषेदिवान् उपविष्टवान्॥ भाषायां सदवसश्रुवः इति क्वसुः स मुनिः अभिसायं सायंकालाभिमुख्यम् अव्ययीभावः॥
सायंकालस्य कार्ष्ण्योत्कर्षोपमानत्वं श्रितः उदयाद्रिर्येन तस्य चंद्रमसोऽभिरामतां उच्चकैः शोभाम् अचूचुरत् चोरितवान् प्राप्तवानित्यर्थः॥ चूर स्तेये णौ
चङि चङ्॥ अत्रान्यस्यान्यधर्मसंबंधासंभवाच्चंद्रमसोऽभिरामतामिवेत्यौपम्यपर्यवसानसंभावोद्वस्तुसंबंधरूपो निदर्शनाभेदः स चोक्तो

अथ अथ यस्या कथनं प्रथम सर्ग समाप्त इति शेषः एवमुत्तरत्रापि द्रष्टव्यं इति श्रीपदवाक्यप्रमाणपारावारपारीणश्रीमहोपाध्याय कोलाच
लमल्लिनाथसूरिविरचितायां माघकाव्यव्याख्यायां सर्वंकषाख्यायां प्रथमः सर्गः समाप्तः ॥ १५ श्रीकृष्णार्पणमस्तु ॥ शुभंभवतु ४ ॥
शाके १७४३ प्रमाथीनाम संवत्सरे फालगुनशुध्यषष्ठीतद्दिनी समाप्तः ॥ शुभं ॥ शुभं शुभं ॥ ४ ॥